# मूलमध्यमककारिकास्

# नागार्जुन

## mūlamadhyamakakārikā-s

## nāgārjuna

sanskrit in devanāgarī and roman script

FOR FREE DISTRIBUTION

EDITED BY DOUGLAS BACHMAN

2001

अनिरोधमनुत्पादमनुच्छेदमशाश्वतं ।
अनेकार्थमनानार्थमनागमममनिर्गमं ॥
यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं शिवं ।
देशयामास संबुद्धस्तं वन्दे वदतां वरं ॥
anirodhamanutpādamanucchedamaśāśvatam .
anekārthamanānārthamanāgamamanirgamam ..
yaḥ pratītyasamutpādaṃ prapañcopaśamaṃ śivaṃ .
deśayāmāsa saṃbuddhastaṃ vande vadatāṃ varaṃ ..

# प्रत्ययपरीक्ष नाम प्रथमं प्रकरणं

## pratyayaparīkṣa nāma prathamaṃ prakaraṇaṃ

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन के चन ॥ १
na svato nāpi parato na dvābhyāṃ nāpyahetutaḥ .
utpannā jātu vidyante bhāvāḥ kvacana ke cana .. 1

चत्वारः प्रत्यया हेतुश्चालम्बनमनन्तरं ।
तथैवाधिपतेयं च प्रत्ययो नास्ति पञ्चमः ॥ २
catvāraḥ pratyayā hetuścālambanamanantaraṃ .
tathaivādhipateyaṃ ca pratyayo nāsti pañcamaḥ .. 2

न हि स्वभावो भावानां प्रत्ययादिषु विद्यते ।
अविद्यमाने स्वभावे परभावो न विद्यते ॥ ३
na hi svabhāvo bhāvānāṃ pratyayādiṣu vidyate .
avidyamāne svabhāve parabhāvo na vidyate .. 3

क्रिया न प्रत्ययवती नाप्रत्ययवती क्रिया ।
प्रत्यया नाक्रियावन्तः क्रियावन्तश्च सन्त्युत ॥ ४
kriyā na pratyayavatī nāpratyayavatī kriyā .
pratyayā nākriyāvantaḥ kriyāvantaśca santyuta .. 4

उत्पद्यते प्रतीत्येमानितीमे प्रत्ययाः किल ।
यावन्नोत्पद्यत इमे तावन्नाप्रत्ययाः कथं ॥ ५
utpadyate pratītyemānitīme pratyayāḥ kila .
yāvannotpadyata ime tāvannāpratyayāḥ kathaṃ .. 5

नैवासतो नैव सतः प्रत्ययो ऽर्थस्य युज्यते ।
असतः प्रत्ययः कस्य सतश्च प्रत्ययेन किं ॥ ६
naivāsato naiva sataḥ pratyayo ’rthasya yujyate .
asataḥ pratyayaḥ kasya sataśca pratyayena kiṃ .. 6

न सन्नासन्न सदसन्धर्मो निर्वर्तते यदा ।
कथं निर्वर्तको हेतुरेवं सति हि युज्यते ॥ ७
na sannāsanna sadasandharmo nirvartate yadā .
kathaṃ nirvartako heturevaṃ sati hi yujyate .. 7

अनालम्बन एवायं सन् धर्म उपदिश्यते ।
अथानालम्बने धर्मे कुत आलम्बनं पुनः ॥ ८
anālambana evāyaṃ san dharma upadiśyate .
athānālambane dharme kuta ālambanaṃ punaḥ .. 8

अनुत्पन्नेषु धर्मेषु निरोधो नोपपद्यते ।
नानन्तरमतो युक्तं निरुद्धे प्रत्ययश्च कः ॥ ९
anutpanneṣu dharmeṣu nirodho nopapadyate .
nānantaramato yuktaṃ niruddhe pratyayaśca kaḥ .. 9

भावानां निःस्वभावानां न सत्ता विद्यते यतः ।
सतीदमस्मिन् भवतीत्येतन्नैवोपपद्यते ॥ १०
bhāvānāṃ niḥsvabhāvānāṃ na sattā vidyate yataḥ .
satīdamasmin bhavatītyetannaivopapadyate .. 10

न च व्यस्तसमस्तेषु प्रत्ययेष्वस्ति तत्फलं ।
प्रत्ययेभ्यः कथं तच्च भवेन्न प्रत्ययेषु यत् ॥ ११
na ca vyastasamasteṣu pratyayeṣvasti tatphalaṃ .
pratyayebhyaḥ kathaṃ tacca bhavenna pratyayeṣu yat .. 11

अथासदपि तत्तेभ्यः प्रत्ययेभ्यः प्रवर्तते ।
अप्रत्ययेभ्यो ऽपि कस्मान्नाभिप्रवर्तते फलं ॥ १२
athāsadapi tattebhyaḥ pratyayebhyaḥ pravartate .
apratyayebhyo ’pi kasmānnābhipravartate phalaṃ .. 12

फलं च प्रत्ययमयं प्रत्ययाश्चास्वयंमयाः ।
फलमस्वमयेभ्यो यत्तत्प्रत्ययमयं कथं ॥ १३
phalaṃ ca pratyayamayaṃ pratyayāścāsvayaṃmayāḥ .
phalamasvamayebhyo yattatpratyayamayaṃ kathaṃ .. 13

तस्मान्न प्रत्ययमयं नाप्रत्ययमयं फलं ।
संविद्यते फलाभावात्प्रत्ययाप्रत्ययाः कुतः ॥ १४
tasmānna pratyayamayaṃ nāpratyayamayaṃ phalaṃ .
saṃvidyate phalābhāvātpratyayāpratyayāḥ kutaḥ .. 14

# गतागतपरीक्षा नाम द्वितीयं प्रकरणं
## gatāgataparīkṣā nāma dvitīyaṃ prakaraṇaṃ

गतं न गम्यते तावदगतं नैव गम्यते ।
गतागतविनिर्मुक्तं गम्यमानं न गम्यते ॥ १
gataṃ na gamyate tāvadagataṃ naiva gamyate .
gatāgatavinirmuktaṃ gamyamānaṃ na gamyate .. 1

चेष्टा यत्र गतिस्तत्र गम्यमाने च सा यतः ।
न गते नागते चेष्टा गम्यमाने गतिस्ततः ॥ २
ceṣṭā yatra gatistatra gamyamāne ca sā yataḥ .
na gate nāgate ceṣṭā gamyamāne gatistataḥ .. 2

गम्यमानस्य गमनं कथं नामोपपत्स्यते ।
गम्यमानं ह्य अगमनं यदा नैवोपपद्यते ॥ ३
gamyamānasya gamanaṃ kathaṃ nāmopapatsyate .
gamyamānaṃ hya agamanaṃ yadā naivopapadyate .. 3

गम्यमानस्य गमनं यस्य तस्य प्रसज्यते ।
ऋते गतेर्गम्यमानं गम्यमानं हि गम्यते ॥ ४
gamyamānasya gamanaṃ yasya tasya prasajyate .
ṛte gatergamyamānaṃ gamyamānaṃ hi gamyate .. 4

गम्यमानस्य गमने प्रसक्तं गमनद्वयं ।
येन तद्गम्यमानं च यच्चात्र गमनं पुनः ॥ ५
gamyamānasya gamane prasaktaṃ gamanadvayaṃ .
yena tadgamyamānaṃ ca yaccātra gamanaṃ punaḥ .. 5

द्वौ गन्तारौ प्रसज्येते प्रसक्ते गमनद्वये ।
गन्तारं हि तिरस्कृत्य गमनं नोपपद्यते ॥ ६
dvau gantārau prasajyete prasakte gamanadvaye .
gantāraṃ hi tiraskṛtya gamanaṃ nopapadyate .. 6

गन्तारं चेत्तिरस्कृत्य गमनं नोपपद्यते ।
गमने ऽसति गन्ताथ कुत एव भविष्यति ॥ ७
gantāraṃ cettiraskṛtya gamanaṃ nopapadyate .
gamane ’sati gantātha kuta eva bhaviṣyati .. 7

गन्ता न गच्छति तावदगन्ता नैव गच्छति ।
अन्यो गन्तुरगन्तुश्च कस्तृतीयो हि गच्छति ॥ ८
gantā na gacchati tāvadagantā naiva gacchati .
anyo ganturagantuśca kastṛtīyo hi gacchati .. 8

गन्ता तावद्गच्छतीति कथमेवोपपत्स्यते ।
गमनेन विना गन्ता यदा नैवोपपद्यते ॥ ९
gantā tāvadgacchatīti kathamevopapatsyate .
gamanena vinā gantā yadā naivopapadyate .. 9

पक्षो गन्ता गच्छतीति यस्य तस्य प्रसज्यते ।
गमनेन विना गन्ता गन्तुर्गमनमिच्छतः ॥ १०
pakṣo gantā gacchatīti yasya tasya prasajyate .
gamanena vinā gantā ganturgamanamicchataḥ .. 10

गमने द्वे प्रसज्येते गन्ता यद्युत गच्छति ।
गन्तेति चोच्यते येन गन्ता सन्यच्च गच्छति ॥ ११
gamane dve prasajyete gantā yadyuta gacchati .
ganteti cocyate yena gantā sanyacca gacchati .. 11

गते नारभ्यते गन्तुं गन्तं नारभ्यते ऽगते ।
नारभ्यते गम्यमाने गन्तुमारभ्यते कुह ॥ १२
gate nārabhyate gantuṃ gantaṃ nārabhyate ’gate .
nārabhyate gamyamāne gantumārabhyate kuha .. 12

न पूर्वं गमनारम्भाद्गम्यमानं न वा गतं ।
यत्रारभ्येत गमनमगते गमनं कुतः ॥ १३
na pūrvaṃ gamanārambhādgamyamānaṃ na vā gataṃ .
yatrārabhyeta gamanamagate gamanaṃ kutaḥ .. 13

गतं किं गम्यमानं किमगतं किं विकल्प्यते ।
अदृश्यमान आरम्भे गमनस्यैव सर्वथा ॥ १४
gataṃ kiṃ gamyamānaṃ kimagataṃ kiṃ vikalpyate .
adṛśyamāna ārambhe gamanasyaiva sarvathā .. 14

गन्ता न तिष्ठति तावदगन्ता नैव तिष्ठति ।
अन्यो गन्तुरगन्तुश्च कस्तृतीयो ऽथ तिष्ठति ॥ १५
gantā na tiṣṭhati tāvadagantā naiva tiṣṭhati .
anyo ganturagantuśca kastṛtīyo ’tha tiṣṭhati .. 15

गन्ता तावत्तिष्ठतीति कथमेवोपपत्स्यते ॥
गमनेन विना गन्ता यदा नैवोपपद्यते ॥ १६
gantā tāvattiṣṭhatīti kathamevopapatsyate ..
gamanena vinā gantā yadā naivopapadyate .. 16

न तिष्ठति गम्यमानान्न गतान्नागतादपि ।
गमनं संप्रवृत्तिश्च निवृत्तिश्च गतेः समा ॥ १७
na tiṣṭhati gamyamānānna gatānnāgatādapi .
gamanaṃ saṃpravṛttiśca nivṛttiśca gateḥ samā .. 17

यदेव गमनं गन्ता स एवेति न युज्यते ।
अन्य एव पुनर्गन्ता गतेरिति न युज्यते ॥ १८
yadeva gamanaṃ gantā sa eveti na yujyate .
anya eva punargantā gateriti na yujyate .. 18

यदेव गमनं गन्ता स एव हि भवेद्यदि ।
एकीभावः प्रसज्येत कर्तुः कर्मण एव च ॥ १९
yadeva gamanaṃ gantā sa eva hi bhavedyadi .
ekībhāvaḥ prasajyeta kartuḥ karmaṇa eva ca .. 19

अन्य एव पुनर्गन्ता गतेर्यदि विकल्प्यते ।
गमनं स्यादृते गन्तुर्गन्ता स्याद्गमनादृते ॥ २०
anya eva punargantā gateryadi vikalpyate .
gamanaṃ syādṛte ganturgantā syādgamanādṛte .. 20

एकीभावेन वा सिद्धिर्नानाभावेन वा ययोः ।
न विद्यते तयोः सिद्धिः कथं नु खलु विद्यते ॥ २१
ekībhāvena vā siddhirnānābhāvena vā yayoḥ .
na vidyate tayoḥ siddhiḥ kathaṃ nu khalu vidyate .. 21

गत्या ययोच्यते गन्ता गतिं तां स न गच्छति ।
यस्मान्न गतिपूर्वो ऽस्ति कश्चित् किं चिद्धि गच्छति ॥ २२
gatyā yayocyate gantā gatiṃ tāṃ sa na gacchati .
yasmānna gatipūrvo ’sti kaścit kiṃ ciddhi gacchati .. 22

गत्या ययोच्यते गन्ता ततो ऽन्यां स न गच्छति ।
गती द्वे नोपपद्येते यस्मादेके प्रगच्छति ॥ २३

gatyā yayocyate gantā tato 'nyāṃ sa na gacchati .
gatī dve nopapadyete yasmādeke pragacchati .. 23

सद्भूतो गमनं गन्ता त्रिप्रकारं न गच्छति ।
नासद्भूतो ऽपि गमनं त्रिप्रकारं स गच्छति ॥ २४

sadbhūto gamanaṃ gantā triprakāraṃ na gacchati .
nāsadbhūto 'pi gamanaṃ triprakāraṃ sa gacchati .. 24

गमनं सदसद्भूतः त्रिप्रकारं न गच्छति ।
तस्माद्गतिश्च गन्ता च गन्तव्यं च न विद्यते ॥ २५

gamanaṃ sadasadbhūtaḥ triprakāraṃ na gacchati .
tasmādgatiśca gantā ca gantavyaṃ ca na vidyate .. 25

## चक्षुरादीन्द्रियपरीक्षा नाम तृतीयं प्रकरणं

## cakṣurādīndriyaparīkṣā nāma tṛtīyaṃ prakaraṇaṃ

दर्शनं श्रवणं घ्राणं रसनं स्पर्शनं मनः ।
इन्द्रियाणि षडेतेषां द्रष्टव्यादीनि गोचरः ॥ १

darśanaṃ śravaṇaṃ ghrāṇaṃ rasanaṃ sparśanaṃ manaḥ .
indriyāṇi ṣaḍeteṣāṃ draṣṭavyādīni gocaraḥ .. 1

स्वमात्मानं दर्शनं हि तत्तमेव न पश्यति ।
न पश्यति यदात्मानं कथं द्रक्ष्यति तत्परान् ॥ २

svamātmānaṃ darśanaṃ hi tattameva na paśyati .
na paśyati yadātmānaṃ kathaṃ drakṣyati tatparān .. 2

न पर्याप्तो ऽग्निदृष्टान्तो दर्शनस्य प्रसिद्धये ।
सदर्शनः स प्रत्युक्तो गम्यमानगतागतैः ॥ ३

na paryāpto 'gnidṛṣṭānto darśanasya prasiddhaye .
sadarśanaḥ sa pratyukto gamyamānagatāgataiḥ .. 3

नापश्यमानं भवति यदा किं चन दर्शनं ।
दर्शनं पश्यतीत्येवं कथमेतत्तु युज्यते ॥ ४

nāpaśyamānaṃ bhavati yadā kiṃ cana darśanaṃ .
darśanaṃ paśyatītyevaṃ kathametattu yujyate .. 4

पश्यति दर्शनं नैव नैव पश्यत्यदर्शनं ।
व्याख्यातो दर्शनेनैव द्रष्टा चाप्युपगम्यतां ॥ ५

paśyati darśanaṃ naiva naiva paśyatyadarśanaṃ .
vyākhyāto darśanenaiva draṣṭā cāpyupagamyatāṃ .. 5

तिरस्कृत्य द्रष्टा नास्त्यतिरस्कृत्य च दर्शनं ।
द्रष्टव्यं दर्शनं चैव द्रष्टर्यसति ते कुतः ॥ ६

tiraskṛtya draṣṭā nāstyatiraskṛtya ca darśanaṃ .
draṣṭavyaṃ darśanaṃ caiva draṣṭaryasati te kutaḥ .. 6

प्रतीत्य मातापितरौ यथोक्तः पुत्रसंभवः ।
चक्षूरूपे प्रतीत्यैवमुक्तो विज्ञानसंभवः ॥ ७

pratītya mātāpitarau yathoktaḥ putrasaṃbhavaḥ .
cakṣūrūpe pratītyaivamukto vijñānasaṃbhavaḥ .. 7

द्रष्टव्यदर्शनाभावाद्विज्ञानादिचतुष्टयं ।
नास्तीति उपादानादीनि भविष्यन्ति पुनः कथं ॥ ८

draṣṭavyadarśanābhāvādvijñānādicatuṣṭayaṃ .
nāstīti upādānādīni bhaviṣyanti punaḥ kathaṃ .. 8

व्याख्यातं श्रवणं घ्राणं रसनं स्पर्शनं मनः ।
दर्शनेनैव जानीयाच्छ्रोतृश्रोतव्यकादि च ॥ ९

vyākhyātaṃ śravaṇaṃ ghrāṇaṃ rasanaṃ sparśanaṃ manaḥ .
darśanenaiva jānīyācchrotṛśrotavyakādi ca .. 9

# स्कन्धपरीक्षा नाम चतुर्थ प्रकरणं

## skandhaparīkṣā nāma caturthaṃ prakaraṇaṃ

रूपकारणनिर्मुक्तं न रूपमुपलभ्यते ।
रूपेणापि न निर्मुक्तं दृश्यते रूपकारणं ॥ १

rūpakāraṇanirmuktaṃ na rūpamupalabhyate .
rūpeṇāpi na nirmuktaṃ dṛśyate rūpakāraṇaṃ .. 1

रूपकारणनिर्मुक्ते रूपे रूपं प्रसज्यते ।
आहेतुकं न चास्त्यर्थः कश्चिदाहेतुकः क्व चित् ॥ २

rūpakāraṇanirmukte rūpe rūpaṃ prasajyate .
āhetukaṃ na cāstyarthaḥ kaścidāhetukaḥ kva cit .. 2

रूपेण तु विनिर्मुक्तं यदि स्याद्रूपकारणं ।
अकार्यकं कारणं स्याद् नास्त्यकार्यं च कारणं ॥ ३

rūpeṇa tu vinirmuktaṃ yadi syādrūpakāraṇaṃ .
akāryakaṃ kāraṇaṃ syād nāstyakāryaṃ ca kāraṇaṃ .. 3

रूपे सत्येव रूपस्य कारणं नोपपद्यते ।
रूपे ऽसत्येव रूपस्य कारणं नोपपद्यते ॥ ४

rūpe satyeva rūpasya kāraṇaṃ nopapadyate .
rūpe 'satyeva rūpasya kāraṇaṃ nopapadyate .. 4

निष्कारणं पुना रूपं नैव नैवोपपद्यते ।
तस्माद् रूपगतान् कांश्चिन्न विकल्पान् विकल्पयेत् ॥ ५

niṣkāraṇaṃ punā rūpaṃ naiva naivopapadyate .
tasmād rūpagatān kāṃścinna vikalpān vikalpayet .. 5

न कारणस्य सदृशं कार्यमित्युपपद्यते ।
न कारणस्यासदृशं कार्यमित्युपपद्यते ॥ ६

na kāraṇasya sadṛśaṃ kāryamityupapadyate .
na kāraṇasyāsadṛśaṃ kāryamityupapadyate .. 6

वेदनाचित्तसंज्ञानां संस्काराणां च सर्वशः ।
सर्वेषामेव भावानां रूपेणैव समः क्रमः ॥ ७

vedanācittasaṃjñānāṃ saṃskārāṇāṃ ca sarvaśaḥ .
sarveṣāmeva bhāvānāṃ rūpeṇaiva samaḥ kramaḥ .. 7

विग्रहे यः परीहारं कृते शून्यतया वदेत् ।
सर्वं तस्यापरिहृतं समं साध्येन जायते ॥ ८

vigrahe yaḥ parīhāraṃ kṛte śūnyatayā vadet .
sarvaṃ tasyāparihṛtaṃ samaṃ sādhyena jāyate .. 8

व्याख्याने य उपालम्भं कृते शून्यतया वदेत् ।
सर्वं तस्यानुपालब्धं समं साध्येन जायते ॥ ९

vyākhyāne ya upālambhaṃ kṛte śūnyatayā vadet .
sarvaṃ tasyānupālabdhaṃ samaṃ sādhyena jāyate .. 9

# धातुपरीक्षा नाम पञ्चमं प्रकरणं
## dhātuparīkṣā nāma pañcamaṃ prakaraṇaṃ

नाकाशं विद्यते किं चित्पूर्वमाकाशलक्षणात् ।
अलक्षणं प्रसज्येत स्यात्पूर्वं यदि लक्षनात् ॥ १

nākāśaṃ vidyate kiṃ citpūrvamākāśalakṣaṇāt .
alakṣaṇaṃ prasajyeta syātpūrvaṃ yadi lakṣanāt .. 1

अलक्षणो न कश्चिच्च भावः संविद्यते क्व चित् ।
असत्यलक्षणे भावे क्रमतां कुह लक्षणं ॥ २

alakṣaṇo na kaścicca bhāvaḥ saṃvidyate kva cit .
asatyalakṣaṇe bhāve kramatāṃ kuha lakṣaṇaṃ .. 2

नालक्षणे लक्षणस्य प्रवृत्तिर्न सलक्षणे ।
सलक्षणालक्षणाभ्यां नाप्यन्यत्र प्रवर्तते ॥ ३

nālakṣaṇe lakṣaṇasya pravṛttirna salakṣaṇe .
salakṣaṇālakṣaṇābhyāṃ nāpyanyatra pravartate .. 3

लक्षणासंप्रवृत्तौ च न लक्ष्यमुपपद्यते ।
लक्ष्यस्यानुपपत्तौ च लक्षणस्याप्यसंभवः ॥ ४

lakṣaṇāsaṃpravṛttau ca na lakṣyamupapadyate .
lakṣyasyānupapattau ca lakṣaṇasyāpyasaṃbhavaḥ .. 4

तस्मान्न विद्यते लक्ष्यं लक्षणं नैव विद्यते ।
लक्ष्यलक्षणनिर्मुक्तो नैव भावो ऽपि विद्यते ॥ ५

tasmānna vidyate lakṣyaṃ lakṣaṇaṃ naiva vidyate .
lakṣyalakṣaṇanirmukto naiva bhāvo ’pi vidyate .. 5

अविद्यमाने भावे च कस्याभावो भविष्यति ।
भावाभावविधर्मा च भावाभावमवैति कः ॥ ६

avidyamāne bhāve ca kasyābhāvo bhaviṣyati .
bhāvābhāvavidharmā ca bhāvābhāvamavaiti kaḥ .. 6

तस्मान्न भावो नाभावो न लक्ष्यं नापि लक्षणं ।
आकाशं आकाशसमा धातवः पञ्च ये परे ॥ ७
tasmānna bhāvo nābhāvo na lakṣyaṃ nāpi lakṣaṇaṃ .
ākāśaṃ ākāśasamā dhātavaḥ pañca ye pare .. 7

अस्तित्वं ये तु पश्यन्ति नास्तित्वं चाल्पबुद्धयः ।
भावानां ते न पश्यन्ति द्रष्ठव्योपशमं शिवं ॥ ८
astitvaṃ ye tu paśyanti nāstitvaṃ cālpabuddhayaḥ .
bhāvānāṃ te na paśyanti draṣṭhavyopaśamaṃ śivaṃ .. 8

# रागरक्तपरीक्षा नाम षष्ठं प्रकरणं
## rāgaraktaparīkṣā nāma ṣaṣṭhaṃ prakaraṇaṃ

रागाद्यदि भवेत्पूर्वं रक्तो रागतिरस्कृतः ।
तं प्रतीत्य भवेद्रागो रक्ते रागो भवेत्सति ॥ १
rāgādyadi bhavetpūrvaṃ rakto rāgatiraskṛtaḥ .
taṃ pratītya bhavedrāgo rakte rāgo bhavetsati .. 1

रक्ते ऽसति पुना रागः कुत एव भविष्यति ।
सति वासति वा रागे रक्ते ऽप्येष समः क्रमः ॥ २
rakte 'sati punā rāgaḥ kuta eva bhaviṣyati .
sati vāsati vā rāge rakte 'pyeṣa samaḥ kramaḥ .. 2

सहैव पुनरुद्भूतिर्न युक्ता रागरक्तयोः ।
भवेतां रागरक्तौ हि निरपेक्षौ परस्परं ॥ ३
sahaiva punarudbhūtirna yuktā rāgaraktayoḥ .
bhavetāṃ rāgaraktau hi nirapekṣau parasparaṃ .. 3

नैकत्वे सहभावो ऽस्ति न तेनैव हि तत्सह ।
पृथक्त्वे सहभावो ऽथ कुत एव भविष्यति ॥ ४
naikatve sahabhāvo 'sti na tenaiva hi tatsaha .
pṛthaktve sahabhāvo 'tha kuta eva bhaviṣyati .. 4

एकत्वे सहभावश्चेत् स्यात्सहायं विनापि सः ।
पृथक्त्वे सहभावश्चेत् स्यात्सहायं विनापि सः ॥ ५
ekatve sahabhāvaścet syātsahāyaṃ vināpi saḥ .
pṛthaktve sahabhāvaścet syātsahāyaṃ vināpi saḥ .. 5

पृथक्त्वे सहभावश्च यदि किं रागरक्तयोः ।
सिद्धः पृथक्पृथग्भावः सहभावो यतस्तयोः ॥ ६
pṛthaktve sahabhāvaśca yadi kiṃ rāgaraktayoḥ .
siddhaḥ pṛthakpṛthagbhāvaḥ sahabhāvo yatastayoḥ .. 6

सिद्धः पृथक्पृथग्भावो यदि वा रागरक्तयोः ।
सहभावं किमर्थं तु परिकल्पयसे तयोः ॥ ७
siddhaḥ pṛthakpṛthagbhāvo yadi vā rāgaraktayoḥ .
sahabhāvaṃ kimarthaṃ tu parikalpayase tayoḥ .. 7

पृथग्न सिध्यतीत्येवं सहभावं विकाङ्क्षसि ।
सहभावप्रसिद्ध्यर्थं पृथक्त्वं भूय इच्छसि ॥ ८
pṛthagna sidhyatītyevaṃ sahabhāvaṃ vikāṅkṣasi .
sahabhāvaprasiddhyarthaṃ pṛthaktvaṃ bhūya icchasi .. 8

पृथग्भावाप्रसिद्धेश्च सहभावो न सिध्यति ।
कतमस्मिन् पृथग्भावे सहभावं सतीच्छसि ॥ ९
pṛthagbhāvāprasiddheśca sahabhāvo na sidhyati .
katamasmin pṛthagbhāve sahabhāvaṃ satīcchasi .. 9

एवं रक्तेन रागस्य सिद्धिर्न सह नासह ।
रागवत्सर्वधर्माणां सिद्धिर्न सह नासह ॥ १०
evaṃ raktena rāgasya siddhirna saha nāsaha .
rāgavatsarvadharmāṇāṃ siddhirna saha nāsaha .. 10

# संस्कृतपरीक्षा नाम सप्तमं प्रकरणं
## saṃskṛtaparīkṣā nāma saptamaṃ prakaraṇaṃ

यदि संस्कृत उत्पादस्तत्र युक्ता त्रिलक्षणी ।
अथासंस्कृत उत्पादः कथं संस्कृतलक्षणं ॥ १
yadi saṃskṛta utpādastatra yuktā trilakṣaṇī .
athāsaṃskṛta utpādaḥ kathaṃ saṃskṛtalakṣaṇaṃ .. 1

उत्पादाद्यास्त्रयो व्यस्ता नालं लक्षणकर्मणि ।
संस्कृतस्य समस्ताः स्युरेकत्र कथमेकदा ॥ २
utpādādyāstrayo vyastā nālaṃ lakṣaṇakarmaṇi .
saṃskṛtasya samastāḥ syurekatra kathamekadā .. 2

उत्पादस्थितिभङ्गानामन्यत्संस्कृतलक्षणं ।
अस्ति चेदनवस्थैवं नास्ति चेत्ते न संस्कृताः ॥ ३
utpādasthitibhaṅgānāmanyatsaṃskṛtalakṣaṇaṃ .
asti cedanavasthaivaṃ nāsti cette na saṃskṛtāḥ .. 3

उत्पादोत्पाद उत्पादो मूलोत्पादस्य केवलं ।
उत्पादोत्पादमुत्पादो मौलो जनयते पुनः ॥ ४
utpādotpāda utpādo mūlotpādasya kevalaṃ .
utpādotpādamutpādo maulo janayate punaḥ .. 4

उत्पादोत्पाद उत्पादो मूलोत्पादस्य ते यदि ।
मौलेनाजनितस्तं ते स कथं जनयिष्यति ॥ ५
utpādotpāda utpādo mūlotpādasya te yadi .
maulenājanitastaṃ te sa kathaṃ janayiṣyati .. 5

स ते मौलेन जनितो मौलं जनयते यदि ।
मौलः स तेनाजनितस्तमुत्पादयते कथं ॥ ६
sa te maulena janito maulaṃ janayate yadi .
maulaḥ sa tenājanitastamutpādayate kathaṃ .. 6

अयमुत्पद्यमानस्ते काममुत्पादयेदिमं ।
यदीममुत्पादयितुमजातः शक्नुयादयं ॥ ७
ayamutpadyamānaste kāmamutpādayedimaṃ .
yadīmamutpādayitumajātaḥ śaknuyādayaṃ .. 7

प्रदीपः स्वपरात्मानौ संप्रकाशयिता यथा ।
उत्पादः स्वपरात्मानावुभावुत्पादयेत्तथा ॥ ८
pradīpaḥ svaparātmānau saṃprakāśayitā yathā .
utpādaḥ svaparātmānāvubhāvutpādayettathā .. 8

प्रदीपे नान्धकारो ऽस्ति यत्र चासौ प्रतिष्ठितः ।
किं प्रकाशयति दीपः प्रकाशो हि तमोवधः ॥ ९
pradīpe nāndhakāro 'sti yatra cāsau pratiṣṭhitaḥ .
kiṃ prakāśayati dīpaḥ prakāśo hi tamovadhaḥ .. 9

कथमुत्पद्यमानेन प्रदीपेन तमो हतं ।
नोत्पद्यमानो हि तमः प्रदीपः प्राप्नुते यदा ॥ १०
kathamutpadyamānena pradīpena tamo hataṃ .
notpadyamāno hi tamaḥ pradīpaḥ prāpnute yadā .. 10

अप्राप्यैव प्रदीपेन यदि वा निहतं तमः ।
इहस्थः सर्वलोकस्थं स तमो निहनिष्यति ॥ ११
aprāpyaiva pradīpena yadi vā nihataṃ tamaḥ .
ihasthaḥ sarvalokasthaṃ sa tamo nihaniṣyati .. 11

प्रदीपः स्वपरात्मानौ संप्रकाशयते यदि ।
तमो ऽपि स्वपरात्मानौ छादयिष्यत्यसंशयं ॥ १२
pradīpaḥ svaparātmānau saṃprakāśayate yadi .
tamo 'pi svaparātmānau chādayiṣyatyasaṃśayaṃ .. 12

अनुत्पन्नो ऽयमुत्पादः स्वात्मानं जनयेत्कथं ।
अथोत्पन्नो जनयते जाते किं जन्यते पुनः ॥ १३
anutpanno 'yamutpādaḥ svātmānaṃ janayetkathaṃ .
athotpanno janayate jāte kiṃ janyate punaḥ .. 13

नोत्पद्यमानं नोत्पन्नं नानुत्पन्नं कथं चन ।
उत्पद्यते तथाख्यातं गम्यमानगतागतैः ॥ १४
notpadyamānaṃ notpannaṃ nānutpannaṃ kathaṃ cana .
utpadyate tathākhyātaṃ gamyamānagatāgataiḥ .. 14

उत्पद्यमानमुत्पत्ताविदं न क्रमते यदा ।
कथमुत्पद्यमानं तु प्रतीत्योत्पत्तिमुच्यते ॥ १५
utpadyamānamutpattāvidaṃ na kramate yadā .
kathamutpadyamānaṃ tu pratītyotpattimucyate .. 15

प्रतीत्य यद्यद्भवति तत्तच्छान्तं स्वभावतः ।
तस्मादुत्पद्यमानं च शान्तमुत्पत्तिरेव च ॥ १६
pratītya yadyadbhavati tattacchāntaṃ svabhāvataḥ .
tasmādutpadyamānaṃ ca śāntamutpattireva ca .. 16

यदि कश्चिदनुत्पन्नो भावः संविद्यते क्व चित् ।
उत्पद्येत स किं तस्मिन्भाव उत्पद्यते ऽसति ॥ १७
yadi kaścidanutpanno bhāvaḥ saṃvidyate kva cit .
utpadyeta sa kiṃ tasminbhāva utpadyate 'sati .. 17

उत्पद्यमानमुत्पादो यदि चोत्पादयत्ययं ।
उत्पादयेत्तमुत्पादमुत्पादः कतमः पुनः ॥ १८
utpadyamānamutpādo yadi cotpādayatyayaṃ .
utpādayettamutpādamutpādaḥ katamaḥ punaḥ .. 18

अन्य उत्पादयत्येनं यद्युत्पादो ऽनवस्थितिः ।
अथानुत्पाद उत्पन्नः सर्वमुत्पद्यते तथा ॥ १९
anya utpādayatyenaṃ yadyutpādo 'navasthitiḥ .
athānutpāda utpannaḥ sarvamutpadyate tathā .. 19

सतश्च तावदुत्पत्तिरसतश्च न युज्यते ।
न सतश्चासतश्चेति पूर्वमेवोपपादितं ॥ २०
sataśca tāvadutpattirasataśca na yujyate .
na sataścāsataśceti pūrvamevopapāditaṃ .. 20

निरुध्यमानस्योत्पत्तिर्न भावस्योपपद्यते ।
यश्चानिरुध्यमानस्तु स भावो नोपपद्यते ॥ २१
nirudhyamānasyotpattirna bhāvasyopapadyate .
yaścānirudhyamānastu sa bhāvo nopapadyate .. 21

न स्थितभावस्तिष्ठत्यस्थितभावो न तिष्ठति ।
न तिष्ठति तिष्ठमानः को ऽनुत्पन्नश्च तिष्ठति ॥ २२
na sthitabhāvastiṣṭhatyasthitabhāvo na tiṣṭhati .
na tiṣṭhati tiṣṭhamānaḥ ko 'nutpannaśca tiṣṭhati .. 22

स्थितिर्निरुध्यमानस्य न भावस्योपपद्यते ।
यश्चानिरुध्यमानस्तु स भावो नोपपद्यते ॥ २३

sthitirnirudhyamānasya na bhāvasyopapadyate .
yaścānirudhyamānastu sa bhāvo nopapadyate .. 23

जरामरणधर्मेषु सर्वभावेषु सर्वदा ।
तिष्ठन्ति कतमे भावा ये जरामरणं विना ॥ २४

jarāmaraṇadharmeṣu sarvabhāveṣu sarvadā .
tiṣṭhanti katame bhāvā ye jarāmaraṇaṃ vinā .. 24

स्थित्यान्यया स्थितेः स्थानं तयैव च न युज्यते ।
उत्पादस्य यथोत्पादो नात्मना न परात्मना ॥ २५

sthityānyayā sthiteḥ sthānaṃ tayaiva ca na yujyate .
utpādasya yathotpādo nātmanā na parātmanā .. 25

निरुध्यते नानिरुद्धं न निरुद्धं निरुध्यते ।
तथापि निरुध्यमानं किमजातं निरुध्यते ॥ २६

nirudhyate nāniruddhaṃ na niruddhaṃ nirudhyate .
tathāpi nirudhyamānaṃ kimajātaṃ nirudhyate .. 26

स्थितस्य तावद्भावस्य निरोधो नोपपद्यते ।
नास्थितस्यापि भावस्य निरोध उपपद्यते ॥ २७

sthitasya tāvadbhāvasya nirodho nopapadyate .
nāsthitasyāpi bhāvasya nirodha upapadyate .. 27

तयैवावस्थयावस्था न हि सैव निरुध्यते ।
अन्ययावस्थयावस्था न चान्यैव निरुध्यते ॥ २८

tayaivāvasthayāvasthā na hi saiva nirudhyate .
anyayāvasthayāvasthā na cānyaiva nirudhyate .. 28

यदैव सर्वधर्माणामुत्पादो नोपपद्यते ।
तदैवं सर्वधर्माणां निरोधो नोपपद्यते ॥ २९

yadaiva sarvadharmāṇāmutpādo nopapadyate .
tadaivaṃ sarvadharmāṇāṃ nirodho nopapadyate .. 29

सतश्च तावद्भावस्य निरोधो नोपपद्यते ।
एकत्वे न हि भावश्च नाभावश्चोपपद्यते ॥ ३०

sataśca tāvadbhāvasya nirodho nopapadyate .
ekatve na hi bhāvaśca nābhāvaścopapadyate .. 30

असतो ऽपि न भावस्य निरोध उपपद्यते ।
न द्वितीयस्य शिरसः छेदनं विद्यते यथा ॥ ३१

asato 'pi na bhāvasya nirodha upapadyate .
na dvitīyasya śirasaḥ chedanaṃ vidyate yathā .. 31

न स्वात्मना निरोधो ऽस्ति निरोधो न परात्मना ।
उत्पादस्य यथोत्पादो नात्मना न परात्मना ॥ ३२

na svātmanā nirodho 'sti nirodho na parātmanā .
utpādasya yathotpādo nātmanā na parātmanā .. 32

उत्पादस्थितिभङ्गानामसिद्धेर्नास्ति संस्कृतं ।
संस्कृतस्याप्रेसिद्धौ च कथं सेत्स्यत्यसंस्कृतं ॥ ३३

utpādasthitibhaṅgānāmasiddhernāsti saṃskṛtaṃ .
saṃskṛtasyāpresiddhau ca kathaṃ setsyatyasaṃskṛtaṃ .. 33

यथा माया यथा स्वप्नो गन्धर्वनगरं यथा ।
थथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतं ॥ ३४

yathā māyā yathā svapno gandharvanagaraṃ yathā .
thathotpādastathā sthānaṃ tathā bhaṅga udāhṛtaṃ .. 34

# कर्मकारकपरीक्षा नामाष्टमं प्रकरणं

karmakārakaparīkṣā nāmāṣṭamaṃ prakaraṇaṃ

सद्भूतः कारकः कर्म सद्भूतं न करोत्ययं ।
कारको नाप्यसद्भूतः कर्मासद्भूतमीहते ॥ १
sadbhūtaḥ kārakaḥ karma sadbhūtaṃ na karotyayaṃ .
kārako nāpyasadbhūtaḥ karmāsadbhūtamīhate .. 1

सद्भूतस्य क्रिया नास्ति कर्म च स्यादकर्तृकं ।
सद्भूतस्य क्रिया नास्ति कर्ता च स्यादकर्मकः ॥ २
sadbhūtasya kriyā nāsti karma ca syādakartṛkaṃ .
sadbhūtasya kriyā nāsti kartā ca syādakarmakaḥ .. 2

करोति यद्यसद्भूतो ऽसद्भूतं कर्म कारकः ।
अहेतुकं भवेत्कर्म कर्ता चाहेतुको भवेत् ॥ ३
karoti yadyasadbhūto ’sadbhūtaṃ karma kārakaḥ .
ahetukaṃ bhavetkarma kartā cāhetuko bhavet .. 3

हेतावसति कार्यं च कारणं च न विद्यते ।
तदभावे क्रिया कर्ता करणं च न विद्यते ॥ ४
hetāvasati kāryaṃ ca kāraṇaṃ ca na vidyate .
tadabhāve kriyā kartā karaṇaṃ ca na vidyate .. 4

धर्माधर्मौ न विद्येते क्रियादीनामसंभवे ।
धर्मे चासत्यधर्मे च फलं तज्जं न विद्यते ॥ ५
dharmādharmau na vidyete kriyādīnāmasaṃbhave .
dharme cāsatyadharme ca phalaṃ tajjaṃ na vidyate .. 5

फले ऽसति न मोक्षाय न स्वर्गायोपपद्यते ।
मार्गः सर्वक्रियाणां च नैरर्थक्यं प्रसज्यते ॥ ६
phale ’sati na mokṣāya na svargāyopapadyate .
mārgaḥ sarvakriyāṇāṃ ca nairarthakyaṃ prasajyate .. 6

कारकः सदसद्भूतः सदसत्कुरुते न तत् ।
परस्परविरुद्धं हि सच्चासच्चैकतः कुतः ॥ ७
kārakaḥ sadasadbhūtaḥ sadasatkurute na tat .
parasparaviruddhaṃ hi saccāsaccaikataḥ kutaḥ .. 7

सता च क्रियते नासन्नासता क्रियते च सत् ।
कर्त्रा सर्वे प्रसज्यन्ते दोषास्तत्र त एव हि ॥ ८
satā ca kriyate nāsannāsatā kriyate ca sat .
kartrā sarve prasajyante doṣāstatra ta eva hi .. 8

नासद्भूतं न सद्भूतः सदसद्भूतमेव वा ।
करोति कारकः कर्म पूर्वोक्तैरेव हेतुभिः ॥ ९
nāsadbhūtaṃ na sadbhūtaḥ sadasadbhūtameva vā .
karoti kārakaḥ karma pūrvoktaireva hetubhiḥ .. 9

नासद्भूतो ऽपि सद्भूतं सदसद्भूतमेव वा ।
करोति कारकः कर्म पूर्वोक्तैरेव हेतुभिः ॥ १०
nāsadbhūto ’pi sadbhūtaṃ sadasadbhūtameva vā .
karoti kārakaḥ karma pūrvoktaireva hetubhiḥ .. 10

करोति सदसद्भूतो न सन्नासच्च कारकः ।
कर्म तत्तु विजानीयात्पूर्वोक्तैरेव हेतुभिः ॥ ११
karoti sadasadbhūto na sannāsacca kārakaḥ .
karma tattu vijānīyātpūrvoktaireva hetubhiḥ .. 11

प्रतीत्य कारकः कर्म तं प्रतीत्य च कारकं ।
कर्म प्रवर्तते नान्यत्पश्यामः सिद्धिकारणं ॥ १२
pratītya kārakaḥ karma taṃ pratītya ca kārakaṃ .
karma pravartate nānyatpaśyāmaḥ siddhikāraṇaṃ .. 12

एवं विद्यादुपादानं व्युत्सर्गादिति कर्मणः ।
कर्तुश्च कर्मकर्तृभ्यां शेषान् भावान् विभावयेत् ॥ १३
evaṃ vidyādupādānaṃ vyutsargāditi karmaṇaḥ .
kartuśca karmakartṛbhyāṃ śeṣān bhāvān vibhāvayet .. 13

# पूर्वपरीक्षा नाम नवमं प्रकरणं

pūrvaparīkṣā nāma navamaṃ prakaraṇam

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ ।
भवन्ति यस्य प्रागेभ्यः सो ऽस्तीत्येके वदन्त्युत ॥ १
darśanaśravaṇādīni vedanādīni cāpyatha .
bhavanti yasya prāgebhyaḥ so ’stītyeke vadantyuta .. 1

कथं ह्यविद्यमानस्य दर्शनादि भविष्यति ।
भावस्य तस्मात्प्रागेभ्यः सो ऽस्ति भावो व्यवस्थितः ॥ २
kathaṃ hyavidyamānasya darśanādi bhaviṣyati .
bhāvasya tasmātprāgebhyaḥ so ’sti bhāvo vyavasthitaḥ .. 2

दर्शनश्रवणादिभ्यो वेदनादिभ्य एव च ।
यः प्राग्व्यवस्थितो भावः केन प्रज्ञप्यते ऽथ सः ॥ ३
darśanaśravaṇādibhyo vedanādibhya eva ca .
yaḥ prāgvyavasthito bhāvaḥ kena prajñapyate ’tha saḥ .. 3

विनापि दर्शनादीनि यदि चासौ व्यवस्थितः ।
अमून्यपि भविष्यन्ति विना तेन न संशयः ॥ ४
vināpi darśanādīni yadi cāsau vyavasthitaḥ .
amūnyapi bhaviṣyanti vinā tena na saṃśayaḥ .. 4

अज्यते केन चित् कश्चित् किं चित्केन चिदज्यते ।
कुतः किं चिद्विना कश्चित्किं चित्कं चिद्विना कुतः ॥ ५
ajyate kena cit kaścit kiṃ citkena cidajyate .
kutaḥ kiṃ cidvinā kaścitkiṃ citkaṃ cidvinā kutaḥ .. 5

सर्वेभ्यो दर्शनादिभ्यः कश्चित्पूर्वो न विद्यते ।
अज्यते दर्शनादिनामन्येन पुनरन्यदा ॥ ६
sarvebhyo darśanādibhyaḥ kaścitpūrvo na vidyate .
ajyate darśanādināmanyena punaranyadā .. 6

सर्वेभ्यो दर्शनादिभ्यो यदि पूर्वो न विद्यते ।
एकैकस्मात्कथं पूर्वो दर्शनादेः स विद्यते ॥ ७
sarvebhyo darśanādibhyo yadi pūrvo na vidyate .
ekaikasmātkathaṃ pūrvo darśanādeḥ sa vidyate .. 7

द्रष्टा स एव स श्रोता स एव यदि वेदकः ।
एकैकस्माद्भवेत्पूर्वं एवं चैतन्न युज्यते ॥ ८
draṣṭā sa eva sa śrotā sa eva yadi vedakaḥ .
ekaikasmādbhavetpūrvaṃ evaṃ caitanna yujyate .. 8

द्रष्टान्य एव श्रोतान्यो वेदको ऽन्यः पुनर्यदि ।
सति स्याद्द्रष्टरि श्रोता बहुत्वं चात्मनां भवेत् ॥ ९
draṣṭānya eva śrotānyo vedako ’nyaḥ punaryadi .
sati syāddraṣṭari śrotā bahutvaṃ cātmanāṃ bhavet .. 9

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ ।
भवन्ति येभ्यस्तेष्वेष भूतेष्वपि न विद्यते ॥ १०
darśanaśravaṇādīni vedanādīni cāpyatha .
bhavanti yebhyasteṣveṣa bhūteṣvapi na vidyate .. 10

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ ।
न विद्यते चेद्यस्य स न विद्यन्त इमान्यपि ॥ ११
darśanaśravaṇādīni vedanādīni cāpyatha .
na vidyate cedyasya sa na vidyanta imānyapi .. 11

प्राक् च यो दर्शनादिभ्यः सांप्रतं चोर्ध्वमेव च ।
न विद्यते ऽस्ति नास्तीति निवृत्तास्तत्र कल्पनाः ॥ १२
prāk ca yo darśanādibhyaḥ sāṃpratam cordhvameva ca .
na vidyate ’sti nāstīti nivṛttāstatra kalpanāḥ .. 12

# अग्नीन्धनपरीक्षा नाम दशमं प्रकरणं

agnīndhanaparīkṣā nāma daśamaṃ prakaraṇaṃ

यदिन्धनं स चेदग्निरेकत्वं कर्तृकर्मणोः ।
अन्यश्चेदिन्धनादग्निरिन्धनादप्यृते भवेत् ॥ १
yadindhanaṃ sa cedagnirekatvaṃ kartṛkarmaṇoḥ .
anyaścedindhanādagnirindhanādapyṛte bhavet .. 1

नित्यप्रदीप्त एव स्यादप्रदीपनहेतुकः ।
पुनरारम्भवैयर्थ्यमेवं चाकर्मकः सति ॥ २
nityapradīpta eva syādapradīpanahetukaḥ .
punarārambhavaiyarthyamevaṃ cākarmakaḥ sati .. 2

परत्र निरपेक्षत्वादप्रदीपनहेतुकः ।
पुनरारम्भवैयर्थ्यं नित्यदीप्तः प्रसज्यते ॥ ३
paratra nirapekṣatvādapradīpanahetukaḥ .
punarārambhavaiyarthyaṃ nityadīptaḥ prasajyate .. 3

तत्रैतस्मादिध्यमानमिन्धनं भवतीति चेत् ।
केनेध्यतामिन्धनं तत्तावन्मात्रमिदं यदा ॥ ४
tatraitasmādidhyamānamindhanaṃ bhavatīti cet .
kenedhyatāmindhanaṃ tattāvanmātramidaṃ yadā .. 4

अन्यो न प्राप्स्यतेऽप्राप्तो न धक्ष्यत्यदहन् पुनः ।
न निर्वास्यत्यनिर्वाणः स्थास्यते वा स्वलिङ्गवान् ॥ ५
anyo na prāpsyate 'prāpto na dhakṣyatyadahan punaḥ .
na nirvāsyatyanirvāṇaḥ sthāsyate vā svaliṅgavān .. 5

अन्य एवेन्धनादग्निरिन्धनं प्राप्नुयाद्यदि ।
स्त्री संप्राप्नोति पुरुषं पुरुषश्च स्त्रियं यथा ॥ ६
anya evendhanādagnirindhanaṃ prāpnuyādyadi .
strī saṃprāpnoti puruṣaṃ puruṣaśca striyaṃ yathā .. 6

अन्य एवेन्धनादग्निरिन्धनं काममाप्नुयात् ।
आग्नीन्धने यदि स्यातामन्योन्येन तिरस्कृते ॥ ७
anya evendhanādagnirindhanaṃ kāmamāpnuyāt .
āgnīndhane yadi syātāmanyonyena tiraskṛte .. 7

यदीन्धनमपेक्ष्याग्निरपेक्ष्याग्निं यदीन्धनं ।
कतरत्पूर्वनिष्पन्नं यदपेक्ष्याग्निरिन्धनं ॥ ८
yadīndhanamapekṣyāgnirapekṣyāgniṃ yadīndhanaṃ .
kataratpūrvaniṣpannaṃ yadapekṣyāgnirindhanaṃ .. 8

यदीन्धनमपेक्ष्याग्निरग्नेः सिद्धस्य साधनं ।
एवं सतीन्धनं चापि भविष्यति निरग्निकं ॥ ९
yadīndhanamapekṣyāgniragneḥ siddhasya sādhanaṃ .
evaṃ satīndhanaṃ cāpi bhaviṣyati niragnikaṃ .. 9

यो ऽपेक्ष्य सिध्यते भावस्तमेवापेक्ष्य सिध्यति ।
यदि यो ऽपेक्षितव्यः स सिध्यतां कमपेक्ष्य कः ॥ १०
yo 'pekṣya sidhyate bhāvastamevāpekṣya sidhyati .
yadi yo 'pekṣitavyaḥ sa sidhyatāṃ kamapekṣya kaḥ .. 10

यो ऽपेक्ष्य सिध्यते भावः सो ऽसिद्धो पेक्षते कथं ।
अथाप्यपेक्षते सिद्धस्त्वपेक्षास्य न युज्यते ॥ ११
yo 'pekṣya sidhyate bhāvaḥ so 'siddho pekṣate kathaṃ .
athāpyapekṣate siddhastvapekṣāsya na yujyate .. 11

अपेक्ष्येन्धनमग्निर्न नानपेक्ष्याग्निरिन्धनं ।
अपेक्ष्येन्धनमग्निं न नानपेक्ष्याग्निमिन्धनं ॥ १२
apekṣyendhanamagnirna nānapekṣyāgnirindhanaṃ .
apekṣyendhanamagniṃ na nānapekṣyāgnimindhanaṃ .. 12

आगच्छत्यन्यतो नाग्निरिन्धने ऽग्निर्न विद्यते ।
अत्रेन्धने शेषमुक्तं गम्यमानगतागतैः ॥ १३
āgacchatyanyato nāgnirindhane 'gnirna vidyate .
atrendhane śeṣamuktaṃ gamyamānagatāgataiḥ .. 13

इन्धनं पुनरग्निर्न नाग्निरन्यत्र चेन्धनात् ।
नाग्निरिन्धनवान्नाग्नाविन्धनानि न तेषु सः ॥ १४
indhanaṃ punaragnirna nāgniranyatra cendhanāt .
nāgnirindhanavānnāgnāvindhanāni na teṣu saḥ .. 14

अग्नीन्धनाभ्यां व्याख्यात आत्मोपादानयोः क्रमः ।
सर्वो निरवशेषेण सार्धं घटपटादिभिः ॥ १५
agnīndhanābhyāṃ vyākhyāta ātmopādānayoḥ kramaḥ .
sarvo niravaśeṣeṇa sārdhaṃ ghaṭapaṭādibhiḥ .. 15

आत्मनश्च सतत्त्वं ये भावानां च पृथक् पृथक् ।
निर्दिशन्ति न तान्मन्ये शासनस्यार्थकोविदान् ॥ १६
ātmanaśca satattvaṃ ye bhāvānāṃ ca pṛthak pṛthak .
nirdiśanti na tānmanye śāsanasyārthakovidān .. 16

# पूर्वापरकोटिपरीक्षा नामैकादशमं प्रकरणं
## pūrvāparakoṭiparīkṣā nāmaikādaśamaṃ prakaraṇaṃ

पूर्वा प्रज्ञायते कोटिर्नेत्युवाच महामुनिः ।
संसारो ऽनवराग्रो हि नास्यादिर्नापि पश्चिमं ॥ १
pūrvā prajñāyate koṭirnetyuvāca mahāmuniḥ .
saṃsāro ’navarāgro hi nāsyādirnāpi paścimaṃ .. 1

नैवाग्रं नावरं यस्य तस्य मध्यं कुतो भवेत् ।
तस्मान्नात्रोपपद्यन्ते पूर्वापरसहक्रमाः ॥ २
naivāgraṃ nāvaraṃ yasya tasya madhyaṃ kuto bhavet .
tasmānnātropapadyante pūrvāparasahakramāḥ .. 2

पूर्वं जातिर्यदि भवेज्जरामरणमुत्तरं ।
निर्जरामरणा जातिर्भवेज्जायेत चांमृतः ॥ ३
pūrvaṃ jātiryadi bhavejjarāmaraṇamuttaraṃ .
nirjarāmaraṇā jātirbhavejjāyeta cāṃmṛtaḥ .. 3

पश्चाज्जातिर्यदि भवेज्जरामरणमादितः ।
अहेतुकमजातस्य स्याज्जरामरणं कथं ॥ ४
paścājjātiryadi bhavejjarāmaraṇamāditaḥ .
ahetukamajātasya syājjarāmaraṇaṃ kathaṃ .. 4

न जरामरणेनैव जातिश्च सह युज्यते ।
म्रियेत जायमानश्च स्याच्चाहेतुकतोभयोः ॥ ५
na jarāmaraṇenaiva jātiśca saha yujyate .
mriyeta jāyamānaśca syāccāhetukatobhayoḥ .. 5

यत्र न प्रभवन्त्येते पूर्वापरसहक्रमाः ।
प्रपञ्चयन्ति तां जातिं तज्जरामरणं च किं ॥ ६
yatra na prabhavantyete pūrvāparasahakramāḥ .
prapañcayanti tāṃ jātiṃ tajjarāmaraṇaṃ ca kiṃ .. 6

कार्यं च कारणं चैव लक्ष्यं लक्षणमेव च ।
वेदना वेदकश्चैव सन्त्यर्था ये च के चन ॥ ७
पूर्वा न विद्यते कोटिः संसारस्य न केवलं ।
सर्वेषामपि भावानां पूर्वा कोटी न विद्यते ॥ ८

kāryaṃ ca kāraṇaṃ caiva lakṣyaṃ lakṣaṇameva ca .
vedanā vedakaścaiva santyarthā ye ca ke cana .. 7
pūrvā na vidyate koṭiḥ saṃsārasya na kevalaṃ .
sarveṣāmapi bhāvānāṃ pūrvā koṭī na vidyate .. 8

# दुःखपरीक्षा नाम द्वादशमं प्रकरणं

## duḥkhaparīkṣā nāma dvādaśamaṃ prakaraṇaṃ

स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकं ।
दुःखमित्येक इच्छन्ति तच्च कार्यं न युज्यते ॥ १

svayaṃ kṛtaṃ parakṛtaṃ dvābhyāṃ kṛtamahetukaṃ .
duḥkhamityeka icchanti tacca kāryaṃ na yujyate .. 1

स्वयं कृतं यदि भवेत्प्रतीत्य न ततो भवेत् ।
स्कन्धानिमानमी स्कन्धाः संभवन्ति प्रतीत्य हि ॥ २

svayaṃ kṛtaṃ yadi bhavetpratītya na tato bhavet .
skandhānimānamī skandhāḥ saṃbhavanti pratītya hi .. 2

यद्यमीभ्य इमे ऽन्ये स्युरेभ्यो वामी परे यदि ।
भवेत्परकृतं दुःखं परैरेभिरमी कृताः ॥ ३

yadyamībhya ime 'nye syurebhyo vāmī pare yadi .
bhavetparakṛtaṃ duḥkhaṃ parairebhiramī kṛtāḥ .. 3

स्वपुद्गलकृतं दुःखं यदि दुःखं पुनर्विना ।
स्वपुद्गलः स कतमो येन दुःखं स्वयं कृतं ॥ ४

svapudgalakṛtaṃ duḥkhaṃ yadi duḥkhaṃ punarvinā .
svapudgalaḥ sa katamo yena duḥkhaṃ svayaṃ kṛtaṃ .. 4

परपुद्गलजं दुःखं यदि यस्मै प्रदीयते ।
परेण कृत्वा तद्दुःखं स दुःखेन विना कुतः ॥ ५

parapudgalajaṃ duḥkhaṃ yadi yasmai pradīyate .
pareṇa kṛtvā tadduḥkhaṃ sa duḥkhena vinā kutaḥ .. 5

परपुद्गलजं दुःखं यदि कः परपुद्गलः ।
विना दुःखेन यः कृत्वा परस्मै प्रहिणोति तत् ॥ ६

parapudgalajaṃ duḥkhaṃ yadi kaḥ parapudgalaḥ .
vinā duḥkhena yaḥ kṛtvā parasmai prahiṇoti tat .. 6

स्वयं कृतस्याप्रसिद्धेर्दुःखं परकृतं कुतः ।
परो हि दुःखं यत्कुर्यात्तत्तस्य स्यात्स्वयं कृतं ॥ ७
svayaṃ kṛtasyāprasiddherduḥkhaṃ parakṛtaṃ kutaḥ .
paro hi duḥkhaṃ yatkuryāttattasya syātsvayaṃ kṛtaṃ .. 7

न तावत्स्वकृतं दुःखं न हि तेनैव तत्कृतं ।
परो नात्मकृतश्चेत्स्याद्दुःखं परकृतं कथं ॥ ८
na tāvatsvakṛtaṃ duḥkhaṃ na hi tenaiva tatkṛtaṃ .
paro nātmakṛtaścetsyādduḥkhaṃ parakṛtaṃ kathaṃ .. 8

स्यादुभाभ्यां कृतं दुःखं स्यादेकैककृतं यदि ।
पराकारास्वयंकारं दुःखमहेतुकं कुतः ॥ ९
syādubhābhyāṃ kṛtaṃ duḥkhaṃ syādekaikakṛtaṃ yadi .
parākārāsvayaṃkāraṃ duḥkhamahetukaṃ kutaḥ .. 9

न केवलं हि दुःखस्य चातुर्विध्यं न विद्यते ।
बाह्यानामपि भावानां चातुर्विध्यं न विद्यते ॥ १०
na kevalaṃ hi duḥkhasya cāturvidhyaṃ na vidyate .
bāhyānāmapi bhāvānāṃ cāturvidhyaṃ na vidyate .. 10

# संस्कारपरीक्षा नाम त्रयोदशमं प्रकरणं
## saṃskāraparīkṣā nāma trayodaśamaṃ prakaraṇaṃ

तन्मृषा मोषधर्म यद्भगवानित्यभाषत ।
सर्वे च मोषधर्माणः संस्कारास्तेन ते मृषा ॥ १
tanmṛṣā moṣadharma yadbhagavānityabhāṣata .
sarve ca moṣadharmāṇaḥ saṃskārāstena te mṛṣā .. 1

तन्मृषा मोषधर्म यद्यदि किं तत्र मुष्यते ।
एतत्तूक्तं भगवता शून्यतापरिदीपकं ॥ २
tanmṛṣā moṣadharma yadyadi kiṃ tatra muṣyate .
etattūktaṃ bhagavatā śūnyatāparidīpakaṃ .. 2

भावानां निःस्वभावत्वमन्यथाभावदर्शनात् ।
अस्वभावो भावो नास्ति भावानां शून्यता यतः ॥ ३
bhāvānāṃ niḥsvabhāvatvamanyathābhāvadarśanāt .
asvabhāvo bhāvo nāsti bhāvānāṃ śūnyatā yataḥ .. 3

कस्य स्यादन्यथाभावः स्वभावश्चेन्न विद्यते ।
कस्य स्यादन्यथाभावः स्वभावो यदि विद्यते ॥ ४
kasya syādanyathābhāvaḥ svabhāvaścenna vidyate .
kasya syādanyathābhāvaḥ svabhāvo yadi vidyate .. 4

तस्यैव नान्यथाभावो नाप्यन्यस्यैव युज्यते ।
युवा न जीर्यते यस्माद्यस्माज्जीर्णो न जीर्यते ॥ ५
tasyaiva nānyathābhāvo nāpyanyasyaiva yujyate .
yuvā na jīryate yasmādyasmājjīrṇo na jīryate .. 5

तस्य चेदन्यथाभावः क्षीरमेव भवेद्दधि ।
क्षीरादन्यस्य कस्य चिद्दधिभावो भविष्यति ॥ ६
tasya cedanyathābhāvaḥ kṣīrameva bhaveddadhi .
kṣīrādanyasya kasya ciddadhibhāvo bhaviṣyati .. 6

यद्यशून्यं भवेत्किं चित्स्याच्छून्यमिति किं चन ।
न किं चिदस्त्यशून्यं च कुतः शून्यं भविष्यति ॥ ७
yadyaśūnyaṃ bhavetkiṃ citsyācchūnyamiti kiṃ cana .
na kiṃ cidastyaśūnyaṃ ca kutaḥ śūnyaṃ bhaviṣyati .. 7

शून्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः ।
येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे ॥ ८
śūnyatā sarvadṛṣṭīnāṃ proktā niḥsaraṇaṃ jinaiḥ .
yeṣāṃ tu śūnyatādṛṣṭistānasādhyān babhāṣire .. 8

# संसर्गपरीक्षा नाम चतुर्दशमं प्रकरणं
## saṃsargaparīkṣā nāma caturdaśamaṃ prakaraṇaṃ

द्रष्टव्यं दर्शनं द्रष्टा त्रीण्येतानि द्विशो द्विशः ।
सर्वशश्च न संसर्गमन्योन्येन व्रजन्त्युत ॥ १
draṣṭavyaṃ darśanaṃ draṣṭā trīṇyetāni dviśo dviśaḥ .
sarvaśaśca na saṃsargamanyonyena vrajantyuta .. 1

एवं रागश्च रक्तश्च रञ्जनीयं च दृश्यतां ।
त्रैधेन शेषाः क्लेशाश्च शेषाण्यायतनानि च ॥ २
evaṃ rāgaśca raktaśca rañjanīyaṃ ca dṛśyatāṃ .
traidhena śeṣāḥ kleśāśca śeṣāṇyāyatanāni ca .. 2

अन्येनान्यस्य संसर्गस्तच्चान्यत्वं न विद्यते ।
द्रष्टव्यप्रभृतीनां यन्न संसर्गं व्रजन्त्यतः ॥ ३
anyenānyasya saṃsargastaccānyatvaṃ na vidyate .
draṣṭavyaprabhṛtīnāṃ yanna saṃsargaṃ vrajantyataḥ .. 3

न च केवलमन्यत्वं द्रष्टव्यादेर्न विद्यते ।
कस्य चित्केन चित्सार्धं नान्यत्वमुपपद्यते ॥ ४
na ca kevalamanyatvaṃ draṣṭavyāderna vidyate .
kasya citkena citsārdhaṃ nānyatvamupapadyate .. 4

अन्यदन्यत्प्रतीत्यान्यन्नान्यदृते ऽन्यतः ।
यत्प्रतीत्य च यत्तस्मात्तदन्यन्नोपपद्यते ॥ ५
anyadanyatpratītyānyannānyadṛte 'nyataḥ .
yatpratītya ca yattasmāttadanyannopapadyate .. 5

यद्यन्यदन्यदन्यस्मादन्यस्मादप्यृते भवेत् ।
तदन्यदन्यदन्यस्मादृते नास्ति च नास्त्यतः ॥ ६
yadyanyadanyadanyasmādanyasmādapyṛte bhavet .
tadanyadanyadanyasmādṛte nāsti ca nāstyataḥ .. 6

नान्यस्मिन् विद्यते ऽन्यत्वमनन्यस्मिन् न विद्यते ।
अविद्यमाने चान्यत्वे नास्त्यन्यद्वा तदेव वा ॥ ७

nānyasmin vidyate ’nyatvamananyasmin na vidyate .
avidyamāne cānyatve nāstyanyadvā tadeva vā .. 7

न तेन तस्य संसर्गो नान्येनान्यस्य युज्यते ।
संसृज्यमानं संसृष्टं संस्रष्टा च न विद्यते ॥ ८

na tena tasya saṃsargo nānyenānyasya yujyate .
saṃsṛjyamānaṃ saṃsṛṣṭaṃ saṃsraṣṭā ca na vidyate .. 8

## स्वभावपरीक्षा नाम पञ्चदशमं प्रकरणं
## svabhāvaparīkṣā nāma pañcadaśamaṃ prakaraṇaṃ

न संभवः स्वभावस्य युक्तः प्रत्ययहेतुभिः ।
हेतुप्रत्ययसंभूतः स्वभावः कृतको भवेत् ॥ १

na saṃbhavaḥ svabhāvasya yuktaḥ pratyayahetubhiḥ .
hetupratyayasaṃbhūtaḥ svabhāvaḥ kṛtako bhavet .. 1

स्वभावः कृतको नाम भविष्यति पुनः कथं ।
अकृत्रिमः स्वभावो हि निरपेक्षः परत्र च ॥ २

svabhāvaḥ kṛtako nāma bhaviṣyati punaḥ kathaṃ .
akṛtrimaḥ svabhāvo hi nirapekṣaḥ paratra ca .. 2

कुतः स्वभावस्याभावे परभावो भविष्यति ।
स्वभावः परभावस्य परभावो हि कथ्यते ॥ ३

kutaḥ svabhāvasyābhāve parabhāvo bhaviṣyati .
svabhāvaḥ parabhāvasya parabhāvo hi kathyate .. 3

स्वभावपरभावाभ्यामृते भावः कुतः पुनः ।
स्वभावे परभावे वा सति भावो हि सिध्यति ॥ ४

svabhāvaparabhāvābhyāmṛte bhāvaḥ kutaḥ punaḥ .
svabhāve parabhāve vā sati bhāvo hi sidhyati .. 4

भावस्य चेदप्रसिद्धिरभावो नैव सिध्यति ।
भावस्य ह्यन्यथाभावमभावं ब्रुवते जनाः ॥ ५

bhāvasya cedaprasiddhirabhāvo naiva sidhyati .
bhāvasya hyanyathābhāvamabhāvaṃ bruvate janāḥ .. 5

स्वभावं परभावं च भावं चाभावमेव च ।
ये पश्यन्ति न पश्यन्ति ते तत्त्वं बुद्धशासने ॥ ६

svabhāvaṃ parabhāvaṃ ca bhāvaṃ cābhāvameva ca .
ye paśyanti na paśyanti te tattvaṃ buddhaśāsane .. 6

कात्यायनाववादे चास्तीति नास्तीति चोभयं ।
प्रतिषिद्धं भगवता भावाभावविभाविना ॥ ७
kātyāyanāvavāde cāstīti nāstīti cobhayaṃ .
pratiṣiddhaṃ bhagavatā bhāvābhāvavibhāvinā .. 7

यद्यस्तित्वं प्रकृत्या स्यान्न भवेदस्य नास्तिता ।
प्रकृतेरन्यथाभावो न हि जातूपपद्यते ॥ ८
yadyastitvaṃ prakṛtyā syānna bhavedasya nāstitā .
prakṛteranyathābhāvo na hi jātūpapadyate .. 8

प्रकृतौ कस्य चासत्यामन्यथात्वं भविष्यति ।
प्रकृतौ कस्य च सत्यामन्यथात्वं भविष्यति ॥ ९
prakṛtau kasya cāsatyāmanyathātvaṃ bhaviṣyati .
prakṛtau kasya ca satyāmanyathātvaṃ bhaviṣyati .. 9

अस्तीति शाश्वतग्राहो नास्तीत्युच्छेददर्शनं ।
तस्मादस्तित्वनास्तित्वे नाश्रीयेत विचक्षणः ॥ १०
astīti śāśvatagrāho nāstītyucchedadarśanaṃ .
tasmādastitvanāstitve nāśrīyeta vicakṣaṇaḥ .. 10

अस्ति यद्धि स्वभावेन न तन्नास्तीति शाश्वतं ।
नास्तीदानीमभूत्पूर्वमित्युच्छेदः प्रसज्यते ॥ ११
asti yaddhi svabhāvena na tannāstīti śāśvataṃ .
nāstīdānīmabhūtpūrvamityucchedaḥ prasajyate .. 11

# बन्धनमोक्षपरीक्षा नाम षोडशमं प्रकरणं
## bandhanamokṣaparīkṣā nāma ṣoḍaśamaṃ prakaraṇaṃ

संस्काराः संसरन्ति चेन्न नित्याः संसरन्ति ते ।
संसरन्ति च नानित्याः सत्त्वे ऽप्येष समः क्रमः ॥ १
saṃskārāḥ saṃsaranti cenna nityāḥ saṃsaranti te .
saṃsaranti ca nānityāḥ sattve ’pyeṣa samaḥ kramaḥ .. 1

पुद्गलः संसरति चेत्स्कन्धायतनधातुषु ।
पञ्चधा मृग्यमाणो ऽसौ नास्ति कः संसरिष्यति ॥ २
pudgalaḥ saṃsarati cetskandhāyatanadhātuṣu .
pañcadhā mṛgyamāṇo ’sau nāsti kaḥ saṃsariṣyati .. 2

उपादानादुपादानं संसरन् विभवो भवेत् ।
विभवश्चानुपादानः कः स किं संसरिष्यति ॥ ३
upādānādupādānaṃ saṃsaran vibhavo bhavet .
vibhavaścānupādānaḥ kaḥ sa kiṃ saṃsariṣyati .. 3

संस्काराणां न निर्वाणं कथं चिदुपपद्यते ।
सत्त्वस्यापि न निर्वाणं कथं चिदुपपद्यते ॥ ४
saṃskārāṇāṃ na nirvāṇaṃ kathaṃ cidupapadyate .
sattvasyāpi na nirvāṇaṃ kathaṃ cidupapadyate .. 4

न बध्यन्ते न मुच्यन्त उदयव्ययधर्मिणः ।
संस्काराः पूर्ववत्सत्त्वो बध्यते न न मुच्यते ॥ ५
na badhyante na mucyanta udayavyayadharmiṇaḥ .
saṃskārāḥ pūrvavatsattvo badhyate na na mucyate .. 5

बन्धनं चेदुपादानं सोपादानो न बध्यते ।
बध्यते नानुपादानः किमवस्थो ऽथ बध्यते ॥ ६
bandhanaṃ cedupādānaṃ sopādāno na badhyate .
badhyate nānupādānaḥ kimavastho ’tha badhyate .. 6

बध्नीयाद्बन्धनं कामं बन्ध्यात्पूर्वं भवेद्यदि ।
न चास्ति तत् शेसमुक्तं गम्यमानगतागतैः ॥ ७
badhnīyādbandhanaṃ kāmaṃ bandhyātpūrvaṃ bhavedyadi .
na cāsti tat śesamuktaṃ gamyamānagatāgataiḥ .. 7

बद्धो न मुच्यते तावदबद्धो नैव मुच्यते ।
स्यातां बद्धे मुच्यमाने युगपद्बन्धमोक्षणे ॥ ८
baddho na mucyate tāvadabaddho naiva mucyate .
syātāṃ baddhe mucyamāne yugapadbandhamokṣaṇe .. 8

निर्वास्याम्यनुपादानो निर्वाणं मे भविष्यति ।
इति येशां ग्रहस्तेषामुपादानमहाग्रहः ॥ ९
nirvāsyāmyanupādāno nirvāṇaṃ me bhaviṣyati .
iti yeśāṃ grahasteṣāmupādānamahāgrahaḥ .. 9

न निर्वाणसमारोपो न संसारापकर्षणं ।
यत्र कस्तत्र संसारो निर्वाणं किं विकल्प्यते ॥ १०
na nirvāṇasamāropo na saṃsārāpakarṣaṇaṃ .
yatra kastatra saṃsāro nirvāṇaṃ kiṃ vikalpyate .. 10

# कर्मफलपरीक्षा नाम सप्तदशमं प्रकरणं
## karmaphalaparīkṣā nāma saptadaśamaṃ prakaraṇaṃ

आत्मसंयमकं चेतः परानुग्राहकं च यत् ।
मैत्रं स धरमस्तद्बीजं फलस्य प्रेत्य चेह च ॥ १
ātmasaṃyamakaṃ cetaḥ parānugrāhakaṃ ca yat .
maitraṃ sa dharamastadbījaṃ phalasya pretya ceha ca .. 1

चेतना चेतयित्वा च कर्मोक्तं परमर्षिणा ।
तस्यानेकविधो भेदः कर्मणः परिकीर्तितः ॥ २
cetanā cetayitvā ca karmoktaṃ paramarṣiṇā .
tasyānekavidho bhedaḥ karmaṇaḥ parikīrtitaḥ .. 2

तत्र यच्चेतनेत्युक्तं कर्म तन्मानसं स्मृतं ।
चेतयित्वा च यत्तूक्तं तत्तु कायिकवाचिकं ॥ ३
tatra yaccetanetyuktaṃ karma tanmānasaṃ smṛtaṃ .
cetayitvā ca yattūktaṃ tattu kāyikavācikaṃ .. 3

वाग्विष्पन्दो ऽविरतयो याश्चाविज्ञप्तिसंज्ञिताः ।
अविज्ञप्तय एवान्याः स्मृता विरतयस्तथा ॥ ४
परिभोगान्वयं पुण्यमपुण्यं च तथाविधं ।
चेतना चेति सप्तैते धर्माः कर्माञ्जनाः स्मृताः ॥ ५
vāgviṣpando ’viratayo yāścāvijñaptisaṃjñitāḥ .
avijñaptaya evānyāḥ smṛtā viratayastathā .. 4
paribhogānvayaṃ puṇyamapuṇyaṃ ca tathāvidhaṃ .
cetanā ceti saptaite dharmāḥ karmāñjanāḥ smṛtāḥ .. 5

तिष्ठत्यापाककालाच्चेत्कर्म तन्नित्यतामियात् ।
निरुद्धं चेन्निरुद्धं सत्किं फलं जनयिष्यति ॥ ६
tiṣṭhatyāpākakālāccetkarma tannityatāmiyāt .
niruddhaṃ cenniruddhaṃ satkiṃ phalaṃ janayiṣyati .. 6

यो ऽङ्कुरप्रभृतिर्बीजात्संतानो ऽभिप्रवर्तते ।
ततः फलमृते बीजात्स च नाभिप्रवर्तते ॥ ७

yo 'ṅkuraprabhṛtirbījātsaṃtāno 'bhipravartate .
tataḥ phalamṛte bījātsa ca nābhipravartate .. 7

बीजाच्च यस्मात्संतानः संतानाच्च फलोद्भवः ।
बीजपूर्वं फलं तस्मान्नोच्छिन्नं नापि शाश्वतं ॥ ८

bījācca yasmātsaṃtānaḥ saṃtānācca phalodbhavaḥ .
bījapūrvaṃ phalaṃ tasmānnocchinnaṃ nāpi śāśvataṃ .. 8

यस्तस्माच्चित्तसंतानश्चेतसो ऽभिप्रवर्तते ।
ततः फलमृते चित्तात्स च नाभिप्रवर्तते ॥ ९

yastasmāccittasaṃtānaścetaso 'bhipravartate .
tataḥ phalamṛte cittātsa ca nābhipravartate .. 9

चित्ताच्च यस्मात्संतानः संतानाच्च फलोद्भवः ।
कर्मपूर्वं फलं तस्मान्नोच्छिन्नं नापि शाश्वतं ॥ १०

cittācca yasmātsaṃtānaḥ saṃtānācca phalodbhavaḥ .
karmapūrvaṃ phalaṃ tasmānnocchinnaṃ nāpi śāśvataṃ .. 10

धर्मस्य साधनोपायाः शुक्लाः कर्मपथा दश ।
फलं कामगुणाः पञ्च धर्मस्य प्रेत्य चेह च ॥ ११

dharmasya sādhanopāyāḥ śuklāḥ karmapathā daśa .
phalaṃ kāmaguṇāḥ pañca dharmasya pretya ceha ca .. 11

बहवश्च महान्तश्च दोषाः स्युरपि कल्पना ।
यद्येषा तेन नैवैषा कल्पनात्रोपपद्यते ॥ १२

bahavaśca mahāntaśca doṣāḥ syurapi kalpanā .
yadyeṣā tena naivaiṣā kalpanātropapadyate .. 12

इमां पुनः प्रवक्ष्यामि कल्पनां यात्र योज्यते ।
बुद्धैः प्रत्येकबुद्धैष्च श्रावकैष्चानुवर्णितां ॥ १३

imāṃ punaḥ pravakṣyāmi kalpanāṃ yātra yojyate .
buddhaiḥ pratyekabuddhaiṣca śrāvakaiṣcānuvarṇitāṃ .. 13

पत्त्रं यथा ऽविप्रणाशस्तथर्णमिव कर्म च ।
चतुर्विधो धातुतः स प्रकृत्या ऽव्याकृतश्च सः ॥ १४

pattraṃ yathā 'vipraṇāśastatharṇamiva karma ca .
caturvidho dhātutaḥ sa prakṛtyā 'vyākṛtaśca saḥ .. 14

प्रहाणतो न प्रहेयो भावनाहेय एव वा ।
तस्मादविप्रणाशेन जायते कर्मणां फलं ॥ १५

prahāṇato na praheyo bhāvanāheya eva vā .
tasmādavipraṇāśena jāyate karmaṇāṃ phalaṃ .. 15

प्रहाणतः प्रहेयः स्यात्कर्मणः संक्रमेण वा ।
यदि दोषाः प्रसज्येरंस्तत्र कर्मवधादयः ॥ १६

prahāṇataḥ praheyaḥ syātkarmaṇaḥ saṃkrameṇa vā .
yadi doṣāḥ prasajyeraṃstatra karmavadhādayaḥ .. 16

सर्वेषां विसभागानां सभागानां च कर्मणां ।
प्रतिसंधौ सधातूनामेक उत्पद्यते तु सः ॥ १७

sarveṣāṃ visabhāgānāṃ sabhāgānāṃ ca karmaṇāṃ .
pratisaṃdhau sadhātūnāmeka utpadyate tu saḥ .. 17

कर्मणः कर्मणो दृष्टे धर्म उत्पद्यते तु सः ।
द्विप्रकारस्य सर्वस्य विपक्वे ऽपि च तिष्ठति ॥ १८

karmaṇaḥ karmaṇo dṛṣṭe dharma utpadyate tu saḥ .
dviprakārasya sarvasya vipakve 'pi ca tiṣṭhati .. 18

फलव्यतिक्रमाद्वा स मरणाद्वा निरुध्यते ।
अनास्रवं सास्रवं च विभागं तत्र लक्षयेत् ॥ १९

phalavyatikramādvā sa maraṇādvā nirudhyate .
anāsravaṃ sāsravaṃ ca vibhāgaṃ tatra lakṣayet .. 19

शून्यता च न चोच्छेदः संसारश्च न शाश्वतं ।
कर्मणो ऽविप्रणाशश्च धर्मो बुद्धेन देशितः ॥ २०

śūnyatā ca na cocchedaḥ saṃsāraśca na śāśvataṃ .
karmaṇo 'vipraṇāśaśca dharmo buddhena deśitaḥ .. 20

कर्म नोत्पद्यते कस्मान् निःस्वभावं यतस्ततः ।
यस्माच्च तदनुत्पन्नं न तस्माद्विप्रणश्यति ॥ २१

karma notpadyate kasmān niḥsvabhāvaṃ yatastataḥ .
yasmācca tadanutpannaṃ na tasmādvipraṇaśyati .. 21

कर्म स्वभावतश्चेत्स्याच्छाश्वतं स्यादसंशयं ।
अकृतं च भवेत्कर्म क्रियते न हि शाश्वतं ॥ २२

karma svabhāvataścetsyācchāśvataṃ syādasaṃśayaṃ .
akṛtaṃ ca bhavetkarma kriyate na hi śāśvataṃ .. 22

अकृताभ्यागमभयं स्यात्कर्माकृतकं यदि ।
अब्रह्मचर्यवासश्च दोषस्तत्र प्रसज्यते ॥ २३
akṛtābhyāgamabhayaṃ syātkarmākṛtakaṃ yadi .
abrahmacaryavāsaśca doṣastatra prasajyate .. 23

व्यवहारा विरुध्यन्ते सर्व एव न संशयः ।
पुण्यपापकृतोर्नैव प्रविभागश्च युज्यते ॥ २४
vyavahārā virudhyante sarva eva na saṃśayaḥ .
puṇyapāpakṛtornaiva pravibhāgaśca yujyate .. 24

तद्विपक्वविपाकं च पुनरेव विपक्ष्यति ।
कर्म व्यवस्थितं यस्मात्तस्मात्स्वाभाविकं यदि ॥ २५
tadvipakvavipākaṃ ca punareva vipakṣyati .
karma vyavasthitaṃ yasmāttasmātsvābhāvikaṃ yadi .. 25

कर्म क्लेशात्मकं चेदं ते च क्लेशा न तत्त्वतः ।
न चेत्ते तत्त्वतः क्लेशाः कर्म स्यात्तत्त्वतः कथं ॥ २६
karma kleśātmakaṃ cedaṃ te ca kleśā na tattvataḥ .
na cette tattvataḥ kleśāḥ karma syāttattvataḥ kathaṃ .. 26

कर्म क्लेशाश्च देहानां प्रत्ययाः समुदाहृताः ।
कर्म क्लेशाश्च ते शून्या यदि देहेषु का कथा ॥ २७
karma kleśāśca dehānāṃ pratyayāḥ samudāhṛtāḥ .
karma kleśāśca te śūnyā yadi deheṣu kā kathā .. 27

अविद्यानिवृतो जन्तुस्तृष्णासंयोजनश्च सः ।
स भोक्ता स च न कर्तुरन्यो न च स एव सः ॥ २८
avidyānivṛto jantustṛṣṇāsaṃyojanaśca saḥ .
sa bhoktā sa ca na karturanyo na ca sa eva saḥ .. 28

न प्रत्ययसमुत्पन्नं नाप्रत्ययसमुत्थितं ।
अस्ति यस्मादिदं कर्म तस्मात्कर्तापि नास्त्यतः ॥ २९
na pratyayasamutpannaṃ nāpratyayasamutthitaṃ .
asti yasmādidaṃ karma tasmātkartāpi nāstyataḥ .. 29

कर्म चेन्नास्ति कर्ता च कुतः स्यात्कर्मजं फलं ।
असत्यथ फले भोक्ता कुत एव भविष्यति ॥ ३०
karma cennāsti kartā ca kutaḥ syātkarmajaṃ phalaṃ .
asatyatha phale bhoktā kuta eva bhaviṣyati .. 30

यथा निर्मितकं शास्ता निर्मिमीत र्द्धिसंपदा ।
निर्मितो निर्मिमीतान्यं स च निर्मितकः पुनः ॥ ३१
तथा निर्मितकाकारः कर्ता यत्कर्म तत्कृतं ।
तद्यथा निर्मितेनान्यो निर्मितो निर्मितस्तथा ॥ ३२
yathā nirmitakaṃ śāstā nirmimīta rddhisaṃpadā .
nirmito nirmimītānyaṃ sa ca nirmitakaḥ punaḥ .. 31
tathā nirmitakākāraḥ kartā yatkarma tatkṛtaṃ .
tadyathā nirmitenānyo nirmito nirmitastathā .. 32

क्लेशाः कर्माणि देहाश्च कर्तारश्च फलानि च ।
गन्धर्वनगराकारा मरीचिस्वप्नसंनिभाः ॥ ३३
kleśāḥ karmāṇi dehāśca kartāraśca phalāni ca .
gandharvanagarākārā marīcisvapnasaṃnibhāḥ .. 33

# आत्मपरीक्षा नामाष्टदशमं प्रकरणं

ātmaparīkṣā nāmāṣṭadaśamaṃ prakaraṇaṃ

आत्मा स्कन्धा यदि भवेदुदयव्ययभाग्भवेत् ।
स्कन्धेभ्यो ऽन्यो यदि भवेद्भवेदस्कन्धलक्षणः ॥ १
ātmā skandhā yadi bhavedudayavyayabhāgbhavet .
skandhebhyo 'nyo yadi bhavedbhavedaskandhalakṣaṇaḥ .. 1

आत्मन्यसति चात्मीयं कुत एव भविष्यति ।
निर्ममो निरहंकारः शमादात्मात्मनीनयोः ॥ २
ātmanyasati cātmīyaṃ kuta eva bhaviṣyati .
nirmamo nirahaṃkāraḥ śamādātmātmanīnayoḥ .. 2

निर्ममो निरहंकारो यश्च सो ऽपि न विद्यते ।
निर्ममं निरहंकारं यः पश्यति न पश्यति ॥ ३
nirmamo nirahaṃkāro yaśca so 'pi na vidyate .
nirmamaṃ nirahaṃkāraṃ yaḥ paśyati na paśyati .. 3

ममेत्यहमिति क्षीणे बहिर्धाध्यात्ममेव च ।
निरुध्यत उपादानं तत्क्षयाज्जन्मनः क्षयः ॥ ४
mametyahamiti kṣīṇe bahirdhādhyātmameva ca .
nirudhyata upādānaṃ tatkṣayājjanmanaḥ kṣayaḥ .. 4

कर्मक्लेशक्षयान्मोक्षः कर्मक्लेशा विकल्पतः ।
ते प्रपञ्चात्प्रपञ्चस्तु शून्यतायां निरुध्यते ॥ ५
karmakleśakṣayānmokṣaḥ karmakleśā vikalpataḥ .
te prapañcātprapañcastu śūnyatāyāṃ nirudhyate .. 5

आत्मेत्यपि प्रज्ञपितमनात्मेत्यपि देशितं ।
बुद्धैर्नात्मा न चानात्मा कश्चिदित्यपि देशितं ॥ ६
ātmetyapi prajñapitamanātmetyapi deśitaṃ .
buddhairnātmā na cānātmā kaścidityapi deśitaṃ .. 6

निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे ।
अनुत्पन्नानिरुद्धा हि निर्वाणमिव धर्मता ॥ ७
nivṛttamabhidhātavyaṃ nivṛtte cittagocare .
anutpannāniruddhā hi nirvāṇamiva dharmatā .. 7

सर्वं तथ्यं न वा तथ्यं तथ्यं चातथ्यमेव च ।
नैवातथ्यं नैव तथ्यमेतद्बुद्धानुशासनं ॥ ८
sarvaṃ tathyaṃ na vā tathyaṃ tathyaṃ cātathyameva ca .
naivātathyaṃ naiva tathyametadbuddhānuśāsanaṃ .. 8

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितं ।
निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणं ॥ ९
aparapratyayaṃ śāntaṃ prapañcairaprapañcitaṃ .
nirvikalpamanānārthametattattvasya lakṣaṇaṃ .. 9

प्रतीत्य यद्यद्भवति न हि तावत्तदेव तत् ।
न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतं ॥ १०
pratītya yadyadbhavati na hi tāvattadeva tat .
na cānyadapi tattasmānnocchinnaṃ nāpi śāśvataṃ .. 10

अनेकार्थमनानार्थमनुच्छेदमशाश्वतं ।
एतत्तल्लोकनाथानां बुद्धानां शासनामृतं ॥ ११
anekārthamanānārthamanucchedamaśāśvataṃ .
etattallokanāthānāṃ buddhānāṃ śāsanāmṛtaṃ .. 11

संबुद्धानामनुत्पादे श्रावकाणां पुनः क्षये ।
ज्ञानं प्रत्येकबुद्धानामसंसर्गात्प्रवर्तते ॥ १२
saṃbuddhānāmanutpāde śrāvakāṇāṃ punaḥ kṣaye .
jñānaṃ pratyekabuddhānāmasaṃsargātpravartate .. 12

# कालपरीक्षा नामैकोनविंशतितमं प्रकरणं
## kālaparīkṣā nāmaikonaviṃśatitamaṃ prakaraṇaṃ

प्रत्युत्पन्नो ऽनागतश्च यद्यतीतमपेक्ष्य हि ।
प्रत्युत्पन्नो ऽनागतश्च काले ऽतीते भविष्यतः ॥ १
pratyutpanno 'nāgataśca yadyatītamapekṣya hi .
pratyutpanno 'nāgataśca kāle 'tīte bhaviṣyataḥ .. 1

प्रत्युत्पन्नो ऽनागतश्च न स्तस्तत्र पुनर्यदि ।
प्रत्युत्पन्नो ऽनागतश्च स्यातां कथमपेक्ष्य तम् ॥ २
pratyutpanno 'nāgataśca na stastatra punaryadi .
pratyutpanno 'nāgataśca syātāṃ kathamapekṣya tam .. 2

अनपेक्ष्य पुनः सिद्धिर्नातीतं विद्यते तयोः ।
प्रत्युत्पन्नो ऽनागतश्च तस्मात्कालो न विद्यते ॥ ३
anapekṣya punaḥ siddhirnātītaṃ vidyate tayoḥ .
pratyutpanno 'nāgataśca tasmātkālo na vidyate .. 3

एतेनैवावशिष्टौ द्वौ क्रमेण परिवर्तकौ ।
उत्तमाधममध्यादीनेकत्वादींश्च लक्षयेत् ॥ ४
etenaivāvaśiṣṭau dvau krameṇa parivartakau .
uttamādhamamadhyādīnekatvādīṃśca lakṣayet .. 4

नास्थितो गृह्यते कालः स्थितः कालो न विद्यते ।
यो गृह्येतागृहीतश्च कालः प्रज्ञप्यते कथं ॥ ५
nāsthito gṛhyate kālaḥ sthitaḥ kālo na vidyate .
yo gṛhyetāgṛhītaśca kālaḥ prajñapyate kathaṃ .. 5

भावं प्रतीत्य कालश्चेत्कालो भावादृते कुतः ।
न च कश्चन भावो ऽस्ति कुतः कालो भविष्यति ॥ ६
bhāvaṃ pratītya kālaścetkālo bhāvādṛte kutaḥ .
na ca kaścana bhāvo 'sti kutaḥ kālo bhaviṣyati .. 6

# सामग्रीपरीक्षा नाम विंशतितमं प्रकरणं
## sāmagrīparīkṣā nāma viṃśatitamaṃ prakaraṇaṃ

हेतोश्च प्रत्ययानां च सामग्र्या जायते यदि ।
फलमस्ति च सामग्र्यां सामग्र्या जायते कथं ॥ १
hetośca pratyayānāṃ ca sāmagryā jāyate yadi .
phalamasti ca sāmagryāṃ sāmagryā jāyate kathaṃ .. 1

हेतोश्च प्रत्ययानां च सामग्र्या जायते यदि ।
फलं नास्ति च सामग्र्यां सामग्र्या जायते कथं ॥ २
hetośca pratyayānāṃ ca sāmagryā jāyate yadi .
phalaṃ nāsti ca sāmagryāṃ sāmagryā jāyate kathaṃ .. 2

हेतोश्च प्रत्ययानां च सामग्र्यामस्ति चेत्फलं ।
गृह्येत ननु सामग्र्यां सामग्र्यां च न गृह्यते ॥ ३
hetośca pratyayānāṃ ca sāmagryāmasti cetphalaṃ .
gṛhyeta nanu sāmagryāṃ sāmagryāṃ ca na gṛhyate .. 3

हेतोश्च प्रत्ययानां च सामग्र्यां नास्ति चेत्फलं ।
हेतवः प्रत्ययाश्च स्युरहेतुप्रत्ययैः समाः ॥ ४
hetośca pratyayānāṃ ca sāmagryāṃ nāsti cetphalaṃ .
hetavaḥ pratyayāśca syurahetupratyayaiḥ samāḥ .. 4

हेतुकं फलस्य दत्त्वा यदि हेतुर्निरुध्यते ।
यद्दत्तं यन्निरुधं च हेतोरात्मद्वयं भवेत् ॥ ५
hetukaṃ phalasya dattvā yadi heturnirudhyate .
yaddattaṃ yannirudhaṃ ca hetorātmadvayaṃ bhavet .. 5

हेतुं फलस्यादत्त्वा च यदि हेतुर्निरुध्यते ।
हेतौ निरुद्धे जातं तत्फलमाहेतुकं भवेत् ॥ ६
hetuṃ phalasyādattvā ca yadi heturnirudhyate .
hetau niruddhe jātaṃ tatphalamāhetukaṃ bhavet .. 6

फलं सहैव सामग्र्या यदि प्रादुर्भवेत्पुनः ।
एककालौ प्रसज्येते जनको यश्च जन्यते ॥ ७
phalaṃ sahaiva sāmagryā yadi prādurbhavetpunaḥ .
ekakālau prasajyete janako yaśca janyate .. 7

पूर्वमेव च सामग्र्याः फलं प्रादुर्भवेद्यदि ।
हेतुप्रत्ययनिर्मुक्तं फलमाहेतुकं भवेत् ॥ ८
pūrvameva ca sāmagryāḥ phalaṃ prādurbhavedyadi .
hetupratyayanirmuktaṃ phalamāhetukaṃ bhavet .. 8

निरुद्धे चेत्फलं हेतौ हेतोः संक्रमणं भवेत् ।
पूर्वजातस्य हेतोश्च पुनर्जन्म प्रसज्यते ॥ ९
niruddhe cetphalaṃ hetau hetoḥ saṃkramaṇaṃ bhavet .
pūrvajātasya hetośca punarjanma prasajyate .. 9

जनयेत्फलमुत्पन्नं निरुद्धो ऽस्तंगतः कथं ।
तिष्ठन्नपि कथं हेतुः फलेन जनयेद्वृतः ॥ १०
janayetphalamutpannaṃ niruddho ’staṃgataḥ kathaṃ .
tiṣṭhannapi kathaṃ hetuḥ phalena janayedvṛtaḥ .. 10

अथावृतः फलेनासौ कतमज्जनयेत्फलं ।
न ह्यदृष्ट्वा वा दृष्ट्वा वा हेतुर्जनयते फलं ॥ ११
athāvṛtaḥ phalenāsau katamajjanayetphalaṃ .
na hyadṛṣṭvā vā dṛṣṭvā vā heturjanayate phalaṃ .. 11

नातीतस्य ह्यतीतेन फलस्य सह हेतुना ।
नाजातेन न जातेन संगतिर्जातु विद्यते ॥ १२
nātītasya hyatītena phalasya saha hetunā .
nājātena na jātena saṃgatirjātu vidyate .. 12

न जातस्य ह्यजातेन फलस्य सह हेतुना ।
नातीतेन न जातेन संगतिर्जातु विद्यते ॥ १३
na jātasya hyajātena phalasya saha hetunā .
nātītena na jātena saṃgatirjātu vidyate .. 13

नाजातस्य हि जातेन फलस्य सह हेतुना ।
नाजातेन न नष्तेन संगतिर्जातु विद्यते ॥ १४
nājātasya hi jātena phalasya saha hetunā .
nājātena na naṣtena saṃgatirjātu vidyate .. 14

असत्यां संगतौ हेतुः कथं जनयते फलं ।
सत्यां वा संगतौ हेतुः कथं जनयते फलं ॥ १५
asatyāṃ saṃgatau hetuḥ kathaṃ janayate phalaṃ .
satyāṃ vā saṃgatau hetuḥ kathaṃ janayate phalaṃ .. 15

हेतुः फलेन शून्यश्चेत्कथं जनयते फलं ।
हेतुः फलेनाशून्यश्चेत्कथं जनयते फलं ॥ १६
hetuḥ phalena śūnyaścetkathaṃ janayate phalaṃ .
hetuḥ phalenāśūnyaścetkathaṃ janayate phalaṃ .. 16

फलं नोत्पत्स्यते ऽशून्यमशून्यं न निरोत्स्यते ।
अनिरुद्धमनुत्पन्नमशून्यं तद्भविष्यति ॥ १७
phalaṃ notpatsyate ’śūnyamaśūnyaṃ na nirotsyate .
aniruddhamanutpannamaśūnyaṃ tadbhaviṣyati .. 17

कथमुत्पत्स्यते शून्यं कथं शून्यं निरोत्स्यते ।
शून्यमप्यनिरुद्धं तदनुत्पन्नं प्रसज्यते ॥ १८
kathamutpatsyate śūnyaṃ kathaṃ śūnyaṃ nirotsyate .
śūnyamapyaniruddhaṃ tadanutpannaṃ prasajyate .. 18

हेतोः फलस्य चैकत्वं न हि जातूपपद्यते ।
हेतोः फलस्य चान्यत्वं न हि जातूपपद्यते ॥ १९
hetoḥ phalasya caikatvaṃ na hi jātūpapadyate .
hetoḥ phalasya cānyatvaṃ na hi jātūpapadyate .. 19

एकत्वे फलहेत्वोः स्यादैक्यं जनकजन्ययोः ।
पृथक्त्वे फलहेत्वोः स्यात्तुल्यु हेतुरहेतुना ॥ २०
ekatve phalahetvoḥ syādaikyaṃ janakajanyayoḥ .
pṛthaktve phalahetvoḥ syāttulyu heturahetunā .. 20

फलं स्वभावसद्भूतं किं हेतुर्जनयिष्यति ।
फलं स्वभावासद्भूतं किं हेतुर्जनयिष्यति ॥ २१
phalaṃ svabhāvasadbhūtaṃ kiṃ heturjanayiṣyati .
phalaṃ svabhāvāsadbhūtaṃ kiṃ heturjanayiṣyati .. 21

न चाजनयमानस्य हेतुत्वमुपपद्यते ।
हेतुत्वानुपपत्तौ च फलं कस्य भविष्यति ॥ २२
na cājanayamānasya hetutvamupapadyate .
hetutvānupapattau ca phalaṃ kasya bhaviṣyati .. 22

न च प्रत्ययहेतूनामियमात्मानमात्मना ।
या सामग्री जनयते सा कथं जनयेत्फलं ॥ २३

na ca pratyayahetūnāmiyamātmānamātmanā .
yā sāmagrī janayate sā kathaṃ janayetphalaṃ .. 23

न सामग्रीकृतं फलं नासामग्रीकृतं फलं ।
अस्ति प्रत्ययसामग्री कुत एव फलं विना ॥ २४

na sāmagrīkṛtaṃ phalaṃ nāsāmagrīkṛtaṃ phalaṃ .
asti pratyayasāmagrī kuta eva phalaṃ vinā .. 24

# संभवविभवपरीक्षा नामैकविंशतितमं प्रकरणं

saṃbhavavibhavaparīkṣā nāmaikaviṃśatitamaṃ prakaraṇaṃ

विना वा सह वा नास्ति विभवः संभवेन वै ।
विना वा सह वा नास्ति संभवो विभवेन वै ॥ १

vinā vā saha vā nāsti vibhavaḥ saṃbhavena vai .
vinā vā saha vā nāsti saṃbhavo vibhavena vai .. 1

भविष्यति कथं नाम विभवः संभवं विना ।
विनैव जन्म मरणं विभवो नोद्भवं विना ॥ २

bhaviṣyati kathaṃ nāma vibhavaḥ saṃbhavaṃ vinā .
vinaiva janma maraṇaṃ vibhavo nodbhavaṃ vinā .. 2

संभवेनैव विभवः कथं सह भविष्यति ।
न जन्ममरणं चैवं तुल्यकालं हि विद्यते ॥ ३

saṃbhavenaiva vibhavaḥ kathaṃ saha bhaviṣyati .
na janmamaraṇaṃ caivaṃ tulyakālaṃ hi vidyate .. 3

भविष्यति कथं नाम संभवो विभवं विना ।
अनित्यता हि भावेषु न कदाचिन्न विद्यते ॥ ४

bhaviṣyati kathaṃ nāma saṃbhavo vibhavaṃ vinā .
anityatā hi bhāveṣu na kadācinna vidyate .. 4

संभवो विभवेनैव कथं सह भविष्यति ।
न जन्ममरणं चैव तुल्यकालं हि विद्यते ॥ ५

saṃbhavo vibhavenaiva kathaṃ saha bhaviṣyati .
na janmamaraṇaṃ caiva tulyakālaṃ hi vidyate .. 5

सहान्योन्येन वा सिद्धिर्विनान्योन्येन वा ययोः ।
न विद्यते तयोः सिद्धिः कथं नु खलु विद्यते ॥ ६

sahānyonyena vā siddhirvinānyonyena vā yayoḥ .
na vidyate tayoḥ siddhiḥ kathaṃ nu khalu vidyate .. 6

क्षयस्य संभवो नास्ति नाक्षयस्यास्ति संभवः ।
क्षयस्य विभवो नास्ति विभवो नाक्षयस्य च ॥ ७
kṣayasya saṃbhavo nāsti nākṣayasyāsti saṃbhavaḥ .
kṣayasya vibhavo nāsti vibhavo nākṣayasya ca .. 7

संभवो विभवश्चैव विना भावं न विद्यते ।
संभवं विभवं चैव विना भावो न विद्यते ॥ ८
saṃbhavo vibhavaścaiva vinā bhāvaṃ na vidyate .
saṃbhavaṃ vibhavaṃ caiva vinā bhāvo na vidyate .. 8

संभवो विभवश्चैव न शून्यस्योपपद्यते ।
संभवो विभवश्चैव नाशून्यस्योपपद्यते ॥ ९
saṃbhavo vibhavaścaiva na śūnyasyopapadyate .
saṃbhavo vibhavaścaiva nāśūnyasyopapadyate .. 9

संभवो विभवश्चैव नैक इत्युपपद्यते ।
संभवो विभवश्चैव न नानेत्युपपद्यते ॥ १०
saṃbhavo vibhavaścaiva naika ityupapadyate .
saṃbhavo vibhavaścaiva na nānetyupapadyate .. 10

दृश्यते संभवश्चैव विभवश्चैव ते भवेत् ।
दृश्यते संभवश्चैव मोहाद्विभव एव च ॥ ११
dṛśyate saṃbhavaścaiva vibhavaścaiva te bhavet .
dṛśyate saṃbhavaścaiva mohādvibhava eva ca .. 11

न भावाज्जायते भावो भावो ऽभावान्न जायते ।
नाभावाज्जायते ऽभावो ऽभावो भावान्न जायते ॥ १२
na bhāvājjāyate bhāvo bhāvo ’bhāvānna jāyate .
nābhāvājjāyate ’bhāvo ’bhāvo bhāvānna jāyate .. 12

न स्वतो जायते भावः परतो नैव जायते ।
न स्वतः परतश्चैव जायते जायते कुतः ॥ १३
na svato jāyate bhāvaḥ parato naiva jāyate .
na svataḥ parataścaiva jāyate jāyate kutaḥ .. 13

भावमभ्युपपन्नस्य शाश्वतोच्छेददर्शनं ।
प्रसज्यते स भावो हि नित्यो ऽनित्यो ऽथ वा भवेत् ॥ १४
bhāvamabhyupapannasya śāśvatocchedadarśanaṃ .
prasajyate sa bhāvo hi nityo ’nityo ’tha vā bhavet .. 14

भावमभ्युपपन्नस्य नैवोच्छेदो न शाश्वतं ।
उदयव्ययसंतानः फलहेत्वोर्भवः स हि ॥ १५
bhāvamabhyupapannasya naivocchedo na śāśvataṃ .
udayavyayasaṃtānaḥ phalahetvorbhavaḥ sa hi .. 15

उदयव्ययसंतानः फलहेत्वोर्भवः स चेत् ।
व्ययस्यापुनरुत्पत्तेर्हेतूच्छेदः प्रसज्यते ॥ १६
udayavyayasaṃtānaḥ phalahetvorbhavaḥ sa cet .
vyayasyāpunarutpatterhetūcchedaḥ prasajyate .. 16

सद्भावस्य स्वभावेन नासद्भावश्च युज्यते ।
निर्वाणकाले चोच्छेदः प्रशमाद्भवसंततेः ॥ १७
sadbhāvasya svabhāvena nāsadbhāvaśca yujyate .
nirvāṇakāle cocchedaḥ praśamādbhavasaṃtateḥ .. 17

चरमे न निरुद्धे च प्रथमो युज्यते भवः ।
चरमे नानिरुद्धे च प्रथमो युज्यते भवः ॥ १८
carame na niruddhe ca prathamo yujyate bhavaḥ .
carame nāniruddhe ca prathamo yujyate bhavaḥ .. 18

निरुध्यमाने चरमे प्रथमो यदि जायते ।
निरुध्यमान एकः स्याज्जायमानो ऽपरो भवेत् ॥ १९
nirudhyamāne carame prathamo yadi jāyate .
nirudhyamāna ekaḥ syājjāyamāno ’paro bhavet .. 19

न चेन्निरुध्यमानश्च जायमानश्च युज्यते ।
सार्धं च म्रियते येषु तेषु स्कन्धेषु जायते ॥ २०
na cennirudhyamānaśca jāyamānaśca yujyate .
sārdhaṃ ca mriyate yeṣu teṣu skandheṣu jāyate .. 20

एवं त्रिष्वपि कालेषु न युक्ता भवसंततिः ।
त्रिषु कालेषु या नास्ति सा कथं भवसंततिः ॥ २१
evaṃ triṣvapi kāleṣu na yuktā bhavasaṃtatiḥ .
triṣu kāleṣu yā nāsti sā kathaṃ bhavasaṃtatiḥ .. 21

# तथागतपरीक्षा नाम द्वाविंशतितमं प्रकरणं

tathāgataparīkṣā nāma dvāviṃśatitamaṃ prakaraṇaṃ

स्कन्धा न नान्यः स्कन्धेभ्यो नास्मिन् स्कन्धा न तेषु सः ।
तथागतः स्कन्धवान्न कतमो ऽत्र तथागतः ॥ १
skandhā na nānyaḥ skandhebhyo nāsmin skandhā na teṣu saḥ .
tathāgataḥ skandhavānna katamo 'tra tathāgataḥ .. 1

बुद्धः स्कन्धानुपादाय यदि नास्ति स्वभावतः ।
स्वभावतश्च यो नास्ति कुतः स परभावतः ॥ २
buddhaḥ skandhānupādāya yadi nāsti svabhāvataḥ .
svabhāvataśca yo nāsti kutaḥ sa parabhāvataḥ .. 2

प्रतीत्य परभावं यः सो ऽनात्मेत्युपपद्यते ।
यश्चानात्मा स च कथं भविष्यति तथागतः ॥ ३
pratītya parabhāvaṃ yaḥ so 'nātmetyupapadyate .
yaścānātmā sa ca kathaṃ bhaviṣyati tathāgataḥ .. 3

यदि नास्ति स्वभावश्च परभावः कथं भवेत् ।
स्वभावपरभावाभ्यामृते कः स तथागतः ॥ ४
yadi nāsti svabhāvaśca parabhāvaḥ kathaṃ bhavet .
svabhāvaparabhāvābhyāmṛte kaḥ sa tathāgataḥ .. 4

स्कन्धान्यद्यनुपादाय भवेत्कश्चित्तथागतः ।
स इदानीमुपादद्यादुपादाय ततो भवेत् ॥ ५
skandhānyadyanupādāya bhavetkaścittathāgataḥ .
sa idānīmupādadyādupādāya tato bhavet .. 5

स्कन्धान् चाप्यनुपादाय नास्ति कश्चित्तथागतः ।
यश्च नास्त्यनुपादाय स उपादास्यते कथं ॥ ६
skandhān cāpyanupādāya nāsti kaścittathāgataḥ .
yaśca nāstyanupādāya sa upādāsyate kathaṃ .. 6

न भवत्यनुपादत्तमुपादानं च किं चन ।
न चास्ति निरुपादानः कथं चन तथागतः ॥ ७
na bhavatyanupādattamupādānaṃ ca kiṃ cana .
na cāsti nirupādānaḥ kathaṃ cana tathāgataḥ .. 7

तत्त्वान्यत्वेन यो नास्ति मृग्यमाणश्च पञ्चधा ।
उपादानेन स कथं प्रज्ञप्यते तथागतः ॥ ८
tattvānyatvena yo nāsti mṛgyamāṇaśca pañcadhā .
upādānena sa kathaṃ prajñapyate tathāgataḥ .. 8

यदपीदमुपादानं तत्स्वभावान्न विद्यते ।
स्वभावतश्च यन्नास्ति कुतस्तत्परभावतः ॥ ९
yadapīdamupādānaṃ tatsvabhāvānna vidyate .
svabhāvataśca yannāsti kutastatparabhāvataḥ .. 9

एवं शून्यमुपादानमुपादाता च सर्वशः ।
प्रज्ञप्यते च शून्येन कथं सून्यस्तथागतः ॥ १०
evaṃ śūnyamupādānamupādātā ca sarvaśaḥ .
prajñapyate ca śūnyena kathaṃ sūnyastathāgataḥ .. 10

शून्यमिति न वक्तव्यमशून्यमिति वा भवेत् ।
उभयं नोभयं चेति प्रज्ञप्त्यर्थं तु कथ्यते ॥ ११
śūnyamiti na vaktavyamaśūnyamiti vā bhavet .
ubhayaṃ nobhayaṃ ceti prajñaptyarthaṃ tu kathyate .. 11

शाश्वताशाश्वताद्यत्र कुतः शान्ते चतुष्टयं ।
अन्तानन्तादि चाप्यत्र कुतः शान्ते चतुष्टयं ॥ १२
śāśvatāśāśvatādyatra kutaḥ śānte catuṣṭayaṃ .
antānantādi cāpyatra kutaḥ śānte catuṣṭayaṃ .. 12

येन ग्राहो गृहीतस्तु घनो ऽस्तीति तथागतः ।
नास्तीति स विकल्पयन् निर्वृतस्यापि कल्पयेत् ॥ १३
yena grāho gṛhītastu ghano 'stīti tathāgataḥ .
nāstīti sa vikalpayan nirvṛtasyāpi kalpayet .. 13

स्वभावतश्च शून्ये ऽस्मिंश्चिन्ता नैवोपपद्यते ।
परं निरोधाद्भवति बुद्धो न भवतीति वा ॥ १४
svabhāvataśca śūnye 'smiṃścintā naivopapadyate .
paraṃ nirodhādbhavati buddho na bhavatīti vā .. 14

प्रपञ्चयन्ति ये बुद्धं प्रप्ञ्चातीतमव्यं ।
ते प्रपञ्चहताः सर्वे न पश्यन्ति तथागतं ॥ १५

prapañcayanti ye buddhaṃ prapñcātītamavyaṃ .
te prapañcahatāḥ sarve na paśyanti tathāgataṃ .. 15

तथागतो यत्स्वभावस्तत्स्वभावमिदं जगत् ।
तथागतो निःस्वभावो निःस्वभावमिदं जगत् ॥ १६

tathāgato yatsvabhāvastatsvabhāvamidaṃ jagat .
tathāgato niḥsvabhāvo niḥsvabhāvamidaṃ jagat .. 16

# विपर्यासपरीक्षा नाम त्रयोविंशतितमं प्रकरणं
## viparyāsaparīkṣā nāma trayoviṃśatitamaṃ prakaraṇaṃ

संकल्पप्रभवो रागो द्वेषो मोहश्च कथ्यते ।
शुभाशुभविपर्यासान् संभवन्ति प्रतीत्य हि ॥ १

saṃkalpaprabhavo rāgo dveṣo mohaśca kathyate .
śubhāśubhaviparyāsān saṃbhavanti pratītya hi .. 1

शुभाशुभविपर्यासान् संभवन्ति प्रतीत्य ये ।
ते स्वभावान्न विद्यन्ते तस्मात्क्लेशा न तत्त्वतः ॥ २

śubhāśubhaviparyāsān saṃbhavanti pratītya ye .
te svabhāvānna vidyante tasmātkleśā na tattvataḥ .. 2

आत्मनो ऽस्तित्वनास्तित्वे न कथं चिच्च सिध्यतः ।
तं विनास्तित्वनास्तित्वे क्लेशानां सिध्यतः कथं ॥ ३

ātmano ’stitvanāstitve na kathaṃ cicca sidhyataḥ .
taṃ vināstitvanāstitve kleśānāṃ sidhyataḥ kathaṃ .. 3

कस्य चिद्धि भवन्तीमे क्लेशाः स च न सिध्यति ।
कश्चिदाहो विना कं चित्सन्ति क्लेशा न कस्य चित् ॥ ४

kasya ciddhi bhavantīme kleśāḥ sa ca na sidhyati .
kaścidāho vinā kaṃ citsanti kleśā na kasya cit .. 4

स्वकायदृष्टिवत्क्लेशाः क्लिष्टे सन्ति न पञ्चधा ।
स्वकायदृष्टिवत्क्लिष्टं क्लेशेष्वपि न पञ्चधा ॥ ५

svakāyadṛṣṭivatkleśāḥ kliṣṭe santi na pañcadhā .
svakāyadṛṣṭivatkliṣṭaṃ kleśeṣvapi na pañcadhā .. 5

स्वभावतो न विद्यन्ते शुभाशुभविपर्ययाः ।
प्रतीत्य कतमान् क्लेशाः शुभाशुभविपर्ययान् ॥ ६

svabhāvato na vidyante śubhāśubhaviparyayāḥ .
pratītya katamān kleśāḥ śubhāśubhaviparyayān .. 6

रूपशब्दरसस्पर्शा गन्धा धर्माश्च षड्विधं ।
वस्तु रागस्य द्वेषस्य मोहस्य च विकल्प्यते ॥ ७
rūpaśabdarasasparśā gandhā dharmāśca ṣaḍvidhaṃ .
vastu rāgasya dveṣasya mohasya ca vikalpyate .. 7

रूपशब्दरसस्पर्शा गन्धा धर्माश्च केवलाः ।
गन्धर्वनगराकारा मरीचिस्वप्नसंनिभाः ॥ ८
rūpaśabdarasasparśā gandhā dharmāśca kevalāḥ .
gandharvanagarākārā marīcisvapnasaṃnibhāḥ .. 8

अशुभं वा शुभं वापि कुतस्तेषु भविष्यति ।
मायापुरुषकल्पेषु प्रतिबिम्बसमेषु च ॥ ९
aśubhaṃ vā śubhaṃ vāpi kutasteṣu bhaviṣyati .
māyāpuruṣakalpeṣu pratibimbasameṣu ca .. 9

अनपेक्ष्य शुभं नास्त्यशुभं प्रज्ञपयेमहि ।
यत्प्रतीत्य शुभं तस्माच्छुभं नैवोपपद्यते ॥ १०
anapekṣya śubhaṃ nāstyaśubhaṃ prajñapayemahi .
yatpratītya śubhaṃ tasmācchubhaṃ naivopapadyate .. 10

अनपेक्ष्याशुभं नास्ति शुभं प्रज्ञपयेमहि ।
यत्प्रतीत्याशुभं तस्मादशुभं नैव विद्यते ॥ ११
anapekṣyāśubhaṃ nāsti śubhaṃ prajñapayemahi .
yatpratītyāśubhaṃ tasmādaśubhaṃ naiva vidyate .. 11

अविद्यमाने च शुभे कुतो रागो भविष्यति ।
अशुभे ऽविद्यमाने च कुतो द्वेषो भविष्यति ॥ १२
avidyamāne ca śubhe kuto rāgo bhaviṣyati .
aśubhe ’vidyamāne ca kuto dveṣo bhaviṣyati .. 12

अनित्ये नित्यमित्येवं यदि ग्राहो विपर्ययः ।
नानित्यं विद्यते शून्ये कुतो ग्राहो विपर्ययः ॥ १३
anitye nityamityevaṃ yadi grāho viparyayaḥ .
nānityaṃ vidyate śūnye kuto grāho viparyayaḥ .. 13

अनित्ये नित्यमित्येवं यदि ग्राहो विपर्ययः ।
अनित्यमित्यपि ग्राहः शून्ये किं न विपर्ययः ॥ १४
anitye nityamityevaṃ yadi grāho viparyayaḥ .
anityamityapi grāhaḥ śūnye kiṃ na viparyayaḥ .. 14

येन गृह्णाति यो ग्राहो ग्रहीता यच्च गृह्यते ।
उपशान्तानि सर्वाणि तस्माद्ग्राहो न विद्यते ॥ १५
yena gṛhṇāti yo grāho grahītā yacca gṛhyate .
upaśāntāni sarvāṇi tasmādgrāho na vidyate .. 15

अविद्यमाने ग्राहे च मिथ्या वा सम्यगेव वा ।
भवेद्विपर्ययः कस्य भवेत्कस्याविपर्ययः ॥ १६
avidyamāne grāhe ca mithyā vā samyageva vā .
bhavedviparyayaḥ kasya bhavetkasyāviparyayaḥ .. 16

न चापि विपरीतस्य संभवन्ति विपर्ययाः ।
न चाप्यविपरीतस्य संभवन्ति विपर्ययाः ॥ १७
na cāpi viparītasya saṃbhavanti viparyayāḥ .
na cāpyaviparītasya saṃbhavanti viparyayāḥ .. 17

न विपर्यस्यमानस्य संभवन्ति विपर्ययाः ।
विमृशस्व स्वयं कस्य संभवन्ति विपर्ययाः ॥ १८
na viparyasyamānasya saṃbhavanti viparyayāḥ .
vimṛśasva svayaṃ kasya saṃbhavanti viparyayāḥ .. 18

अनुत्पन्नाः कथं नाम भविष्यन्ति विपर्ययाः ।
विपर्ययेष्वजातेषु विपर्ययगतः कुतः ॥ १९
anutpannāḥ kathaṃ nāma bhaviṣyanti viparyayāḥ .
viparyayeṣvajāteṣu viparyayagataḥ kutaḥ .. 19

न स्वतो जायते भावः परतो नैव जायते ।
न स्वतः परतश्चेति विपर्ययगतः कुतः ॥ २०
na svato jāyate bhāvaḥ parato naiva jāyate .
na svataḥ parataśceti viparyayagataḥ kutaḥ .. 20

आत्मा च शुचि नित्यं च सुखं च यदि विद्यते ।
आत्मा च शुचि नित्यं च सुखं च न विपर्ययः ॥ २१
ātmā ca śuci nityaṃ ca sukhaṃ ca yadi vidyate .
ātmā ca śuci nityaṃ ca sukhaṃ ca na viparyayaḥ .. 21

नात्मा च शुचि नित्यं च सुखं च यदि विद्यते ।
अनात्मा ऽशुच्यनित्यं च नैव दुःखं च विद्यते ॥ २२
nātmā ca śuci nityaṃ ca sukhaṃ ca yadi vidyate .
anātmā ’śucyanityaṃ ca naiva duḥkhaṃ ca vidyate .. 22

एवं निरुध्यते ऽविद्या विपर्ययनिरोधनात् ।
अविद्यायां निरुद्धायां संस्काराद्यं निरुध्यते ॥ २३
evaṃ nirudhyate ’vidyā viparyayanirodhanāt .
avidyāyāṃ niruddhāyāṃ saṃskārādyaṃ nirudhyate .. 23

यदि भूताः स्वभावेन क्लेशाः के चिद्धि कस्य चित् ।
कथं नाम प्रहीयेरन् कः स्वभावं प्रहास्यति ॥ २४
yadi bhūtāḥ svabhāvena kleśāḥ ke ciddhi kasya cit .
kathaṃ nāma prahīyeran kaḥ svabhāvaṃ prahāsyati .. 24

यद्यभूताः स्वभावेन क्लेशाः के चिद्धि कस्य चित् ।
कथं नाम प्रहीयेरन् को ऽसद्भावं प्रहास्यति ॥ २५
yadyabhūtāḥ svabhāvena kleśāḥ ke ciddhi kasya cit .
kathaṃ nāma prahīyeran ko ’sadbhāvaṃ prahāsyati .. 25

# आर्यसत्यपरीक्षा नाम चतुर्विंशतितमं प्रकरणं
## āryasatyaparīkṣā nāma caturviṃśatitamaṃ prakaraṇaṃ

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते ॥ १
yadi śūnyamidaṃ sarvamudayo nāsti na vyayaḥ .
caturṇāmāryasatyānāmabhāvaste prasajyate .. 1

परिज्ञा च प्रहाणं च भावना साक्षिकर्म च ।
चतुर्णामार्यसत्यानामभावान्नोपपद्यते ॥ २
parijñā ca prahāṇaṃ ca bhāvanā sākṣikarma ca .
caturṇāmāryasatyānāmabhāvānnopapadyate .. 2

तदभावान्न विद्यन्ते चत्वार्यार्यफलानि च ।
फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः ॥ ३
tadabhāvānna vidyante catvāryāryaphalāni ca .
phalābhāve phalasthā no na santi pratipannakāḥ .. 3

संघो नास्ति न चेत्सन्ति ते ऽष्टौ पुरुषपुद्गलाः ।
अभावाच्चार्यसत्यानां सद्धर्मो ऽपि न विद्यते ॥ ४
saṃgho nāsti na cetsanti te ’ṣṭau puruṣapudgalāḥ .
abhāvāccāryasatyānāṃ saddharmo ’pi na vidyate .. 4

धर्मे चासति संघे च कथं बुद्धो भविष्यति ।
एवं त्रीण्यपि रत्नानि ब्रुवाणः प्रतिबाधसे ॥ ५
dharme cāsati saṃghe ca kathaṃ buddho bhaviṣyati .
evaṃ trīṇyapi ratnāni bruvāṇaḥ pratibādhase .. 5

शून्यतां फलसद्भावमधर्मं धर्ममेव च ॥
सर्वसंव्यवहारांश्च लौकिकान् प्रतिबाधसे ॥ ६
śūnyatāṃ phalasadbhāvamadharmaṃ dharmameva ca ..
sarvasaṃvyavahārāṃśca laukikān pratibādhase .. 6

अत्र ब्रूमः शून्यतायां न त्वं वेत्सि प्रयोजनं ।
शून्यतां शून्यतार्थं च तत एवं विहन्यसे ॥ ७
atra brūmaḥ śūnyatāyāṃ na tvaṃ vetsi prayojanaṃ .
śūnyatāṃ śūnyatārthaṃ ca tata evaṃ vihanyase .. 7

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ ८
dve satye samupāśritya buddhānāṃ dharmadeśanā .
lokasaṃvṛtisatyaṃ ca satyaṃ ca paramārthataḥ .. 8

ये ऽनयोर्न विजानन्ति विभागं सत्ययोर्द्वयोः ।
ते तत्त्वं न विजानन्ति गम्भीरं बुद्धशासने ॥ ९
ye 'nayorna vijānanti vibhāgaṃ satyayordvayoḥ .
te tattvaṃ na vijānanti gambhīraṃ buddhaśāsane .. 9

व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥ १०
vyavahāramanāśritya paramārtho na deśyate .
paramārthamanāgamya nirvāṇaṃ nādhigamyate .. 10

विनाशयति दुर्दृष्ता शून्यता मन्दमेधसं ॥
सर्पो यथा दुर्गृहीतो विद्या वा दुष्प्रसाधिता ॥ ११
vināśayati durdṛṣtā śūnyatā mandamedhasaṃ ..
sarpo yathā durgṛhīto vidyā vā duṣprasādhitā .. 11

अतश्च प्रत्युदावृत्तं चित्तं देशयितुं मुनेः ।
धर्मं मत्वास्य धर्मस्य मन्दैर्दुरवगाहतां ॥ १२
ataśca pratyudāvṛttaṃ cittaṃ deśayituṃ muneḥ .
dharmaṃ matvāsya dharmasya mandairduravagāhatāṃ .. 12

शून्यतायामधिलयं यं पुनः कुरुते भवान् ।
दोषप्रसङ्गो नास्माकं स शून्ये नोपपद्यते ॥ १३
śūnyatāyāmadhilayaṃ yaṃ punaḥ kurute bhavān .
doṣaprasaṅgo nāsmākaṃ sa śūnye nopapadyate .. 13

सर्वं च युज्यते तस्य शून्यता यस्य युज्यते ।
सर्वं न युज्यते तस्य शून्यं यस्य न युज्यते ॥ १४
sarvaṃ ca yujyate tasya śūnyatā yasya yujyate .
sarvaṃ na yujyate tasya śūnyaṃ yasya na yujyate .. 14

स त्वं दोषानात्मनीयानस्मासु परिपातयन् ।
अश्वमेवाभिरूढः सन्नश्वमेवासि विस्मृतः ॥ १५
sa tvaṃ doṣānātmanīyānasmāsu paripātayan .
aśvamevābhirūḍhaḥ sannaśvamevāsi vismṛtaḥ .. 15

स्वभावाद्यदि भावानां सद्भावमनुपश्यसि ।
अहेतुप्रत्ययान् भावांस्त्वमेवं सति पश्यसि ॥ १६
svabhāvādyadi bhāvānāṃ sadbhāvamanupaśyasi .
ahetupratyayān bhāvāṃstvamevaṃ sati paśyasi .. 16

कार्यं च कारणं चैव कर्तारं करणं क्रियां ।
उत्पादं च निरोधं च फलं च प्रतिबाधसे ॥ १७
kāryaṃ ca kāraṇaṃ caiva kartāraṃ karaṇaṃ kriyāṃ .
utpādaṃ ca nirodhaṃ ca phalaṃ ca pratibādhase .. 17

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।
सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा ॥ १८
yaḥ pratītyasamutpādaḥ śūnyatāṃ tāṃ pracakṣmahe .
sā prajñaptirupādāya pratipatsaiva madhyamā .. 18

अप्रतीत्य समुत्पन्नो धर्मः कश्चिन्न विद्यते ।
यस्मात्तस्मादशून्यो हि धर्मः कश्चिन्न विद्यते ॥ १९
apratītya samutpanno dharmaḥ kaścinna vidyate .
yasmāttasmādaśūnyo hi dharmaḥ kaścinna vidyate .. 19

यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते ॥ २०
yadyaśūnyamidaṃ sarvamudayo nāsti na vyayaḥ .
caturṇāmāryasatyānāmabhāvaste prasajyate .. 20

अप्रतीत्य समुत्पन्नं कुतो दुःखं भविष्यति ।
अनित्यमुक्तं दुःखं हि तत्स्वाभाव्ये न विद्यते ॥ २१
apratītya samutpannaṃ kuto duḥkhaṃ bhaviṣyati .
anityamuktaṃ duḥkhaṃ hi tatsvābhāvye na vidyate .. 21

स्वभावतो विद्यमानं किं पुनः समुदेष्यते ।
तस्मात्समुदयो नास्ति शून्यतां प्रतिबाधतः ॥ २२
svabhāvato vidyamānaṃ kiṃ punaḥ samudeṣyate .
tasmātsamudayo nāsti śūnyatāṃ pratibādhataḥ .. 22

न निरोधः स्वभावेन सतो दुःखस्य विद्यते ।
स्वभावपर्यवस्थानान्निरोधं प्रतिबाधसे ॥ २३
na nirodhaḥ svabhāvena sato duḥkhasya vidyate .
svabhāvaparyavasthānānnirodhaṃ pratibādhase .. 23

स्वाभाव्ये सति मार्गस्य भावना नोपपद्यते ।
अथासौ भाव्यते मार्गः स्वाभाव्यं ते न विद्यते ॥ २४
svābhāvye sati mārgasya bhāvanā nopapadyate .
athāsau bhāvyate mārgaḥ svābhāvyaṃ te na vidyate .. 24

यदा दुःखं समुदयो निरोधश्च न विद्यते ।
मार्गो दुःखनिरोधत्वात्कतमः प्रापयिष्यति ॥ २५
yadā duḥkhaṃ samudayo nirodhaśca na vidyate .
mārgo duḥkhanirodhatvātkatamaḥ prāpayiṣyati .. 25

स्वभावेनापरिज्ञानं यदि तस्य पुनः कथं ।
परिज्ञानं ननु किल स्वभावः समवस्थितः ॥ २६
svabhāvenāparijñānaṃ yadi tasya punaḥ kathaṃ .
parijñānaṃ nanu kila svabhāvaḥ samavasthitaḥ .. 26

प्रहाणसाक्षात्करणे भावना चैवमेव ते ।
परिज्ञावन्न युज्यन्ते चत्वार्यपि फलानि च ॥ २७
prahāṇasākṣātkaraṇe bhāvanā caivameva te .
parijñāvanna yujyante catvāryapi phalāni ca .. 27

स्वभावेनानधिगतं यत्फलं तत्पुनः कथं ।
शक्यं समधिगन्तुं स्यात्स्वभावं परिगृह्णतः ॥ २८
svabhāvenānadhigataṃ yatphalaṃ tatpunaḥ kathaṃ .
śakyaṃ samadhigantuṃ syātsvabhāvaṃ parigṛhṇataḥ .. 28

फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः ।
संघो नास्ति न चेत्सन्ति ते ऽष्टौ पुरुषपुद्गलाः ॥ २९
phalābhāve phalasthā no na santi pratipannakāḥ .
saṃgho nāsti na cetsanti te 'ṣṭau puruṣapudgalāḥ .. 29

अभावाच्चार्यसत्यानां सद्धर्मो ऽपि न विद्यते ।
धर्मे चासति संघे च कथं बुद्धो भविष्यति ॥ ३०
abhāvāccāryasatyānāṃ saddharmo 'pi na vidyate .
dharme cāsati saṃghe ca kathaṃ buddho bhaviṣyati .. 30

अप्रतीत्यापि बोधिं च तव बुद्धः प्रसज्यते ।
अप्रतीत्यापि बुद्धं च तव बोधिः प्रसज्यते ॥ ३१
apratītyāpi bodhiṃ ca tava buddhaḥ prasajyate .
apratītyāpi buddhaṃ ca tava bodhiḥ prasajyate .. 31

यश्चाबुद्धः स्वभावेन स बोधाय घटन्नपि ।
न बोधिसत्त्वचर्यायां बोधिं ते ऽधिगमिष्यति ॥ ३२
yaścābuddhaḥ svabhāvena sa bodhāya ghaṭannapi .
na bodhisattvacaryāyāṃ bodhiṃ te 'dhigamiṣyati .. 32

न च धर्ममधर्मं वा कश्चिज्जातु करिष्यति ।
किमषून्यस्य कर्तव्यं स्वभावः क्रियते न हि ॥ ३३
na ca dharmamadharmaṃ vā kaścijjātu kariṣyati .
kimaṣūnyasya kartavyaṃ svabhāvaḥ kriyate na hi .. 33

विना धर्ममधर्मं च फलं हि तव विद्यते ।
धर्माधर्मनिमित्तं च फलं तव न विद्यते ॥ ३४
vinā dharmamadharmaṃ ca phalaṃ hi tava vidyate .
dharmādharmanimittaṃ ca phalaṃ tava na vidyate .. 34

धर्माधर्मनिमित्तं वा यदि ते विद्यते फलं ।
धर्माधर्मसमुत्पन्नमशून्यं ते कथं फलं ॥ ३५
dharmādharmanimittaṃ vā yadi te vidyate phalaṃ .
dharmādharmasamutpannamaśūnyaṃ te kathaṃ phalaṃ .. 35

सर्वसंव्यवहारांश्च लौकिकान् प्रतिबाधसे ।
यत्प्रतीत्यसमुत्पादशून्यतां प्रतिबाधसे ॥ ३६
sarvasaṃvyavahārāṃśca laukikān pratibādhase .
yatpratītyasamutpādaśūnyatāṃ pratibādhase .. 36

न कर्तव्यं भवेत्किं चिदनारब्धा भवेत्क्रिया ।
कारकः स्यादकुर्वाणः शून्यतां प्रतिबाधतः ॥ ३७
na kartavyaṃ bhavetkiṃ cidanārabdhā bhavetkriyā .
kārakaḥ syādakurvāṇaḥ śūnyatāṃ pratibādhataḥ .. 37

अजातमनिरुद्धं च कूतश्थं च भविष्यति ।
विचित्राभिरवस्थाभिः स्वभावे रहितं जगत् ॥ ३८
ajātamaniruddhaṃ ca kūtaśthaṃ ca bhaviṣyati .
vicitrābhiravasthābhiḥ svabhāve rahitaṃ jagat .. 38

असंप्राप्तस्य च प्राप्तिर्दुःखपर्यन्तकर्म च ।
सर्वक्लेशप्रहाणं च यद्यषून्यं न विद्यते ॥ ३९

asaṃprāptasya ca prāptirduḥkhaparyantakarma ca .
sarvakleśaprahāṇaṃ ca yadyaṣūnyaṃ na vidyate .. 39

यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्यति ।
दुःखं समुदयं चैव निरोधं मार्गमेव च ॥ ४०

yaḥ pratītyasamutpādaṃ paśyatīdaṃ sa paśyati .
duḥkhaṃ samudayaṃ caiva nirodhaṃ mārgameva ca .. 40

# निर्वाणपरीक्षा नाम पञ्चविंशतितमं प्रकरणं
## nirvāṇaparīkṣā nāma pañcaviṃśatitamaṃ prakaraṇaṃ

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
प्रहाणाद्वा निरोधाद्वा कस्य निर्वाणमिष्यते ॥ १

yadi śūnyamidaṃ sarvamudayo nāsti na vyayaḥ .
prahāṇādvā nirodhādvā kasya nirvāṇamiṣyate .. 1

यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
प्रहाणाद्वा निरोधाद्वा कस्य निर्वाणमिष्यते ॥ २

yadyaśūnyamidaṃ sarvamudayo nāsti na vyayaḥ .
prahāṇādvā nirodhādvā kasya nirvāṇamiṣyate .. 2

अप्रहीणमसंप्राप्तमनुच्छिन्नमशाश्वतं ।
अनिरुद्धमनुत्पन्नमेतन्निर्वाणमुच्यते ॥ ३

aprahīṇamasaṃprāptamanucchinnamaśāśvataṃ .
aniruddhamanutpannametannirvāṇamucyate .. 3

भावस्तावन्न निर्वाणं जरामरणलक्षणं ।
प्रसज्येतास्ति भावो हि न जरामरणं विना ॥ ४

bhāvastāvanna nirvāṇaṃ jarāmaraṇalakṣaṇaṃ .
prasajyetāsti bhāvo hi na jarāmaraṇaṃ vinā .. 4

भावश्च यदि निर्वाणं निर्वाणं संस्कृतं भवेत् ।
नासंस्कृतो हि विद्यते भावः क्व चन कश्चन ॥ ५

bhāvaśca yadi nirvāṇaṃ nirvāṇaṃ saṃskṛtaṃ bhavet .
nāsaṃskṛto hi vidyate bhāvaḥ kva cana kaścana .. 5

भावश्च यदि निर्वाणमनुपादाय तत्कथं ।
निर्वाणं नानुपादाय कश्चिद्भावो हि विद्यते ॥ ६

bhāvaśca yadi nirvāṇamanupādāya tatkathaṃ .
nirvāṇaṃ nānupādāya kaścidbhāvo hi vidyate .. 6

यदि भावो न निर्वाणमभावः किं भविष्यति ।
निर्वाणं यत्र भावो न नाभावस्तत्र विद्यते ॥ ७

yadi bhāvo na nirvāṇamabhāvaḥ kiṃ bhaviṣyati .
nirvāṇaṃ yatra bhāvo na nābhāvastatra vidyate .. 7

यद्यभावश्च निर्वाणमनुपादाय तत्कथं ।
निर्वाणं न ह्यभावो ऽस्ति यो ऽनुपादाय विद्यते ॥ ८

yadyabhāvaśca nirvāṇamanupādāya tatkathaṃ .
nirvāṇaṃ na hyabhāvo 'sti yo 'nupādāya vidyate .. 8

य आजवंजवीभाव उपादाय प्रतीत्य वा ।
सो ऽप्रतीत्यानुपादाय निर्वाणमुपदिश्यते ॥ ९

ya ājavaṃjavībhāva upādāya pratītya vā .
so 'pratītyānupādāya nirvāṇamupadiśyate .. 9

प्रहाणं चाब्रवीच्छास्ता भवस्य विभवस्य च ।
तस्मान्न भावो नाभावो निर्वाणमिति युज्यते ॥ १०

prahāṇaṃ cābravīcchāstā bhavasya vibhavasya ca .
tasmānna bhāvo nābhāvo nirvāṇamiti yujyate .. 10

भवेदभावो भावश्च निर्वाणमुभयं यदि ।
भवेदभावो भावश्च मोक्षस्तच्च न युज्यते ॥ ११

bhavedabhāvo bhāvaśca nirvāṇamubhayaṃ yadi .
bhavedabhāvo bhāvaśca mokṣastacca na yujyate .. 11

भवेदभावो भावश्च निर्वाणमुभयं यदि ।
नानुपादाय निर्वाणमुपादायोभयं हि तत् ॥ १२

bhavedabhāvo bhāvaśca nirvāṇamubhayaṃ yadi .
nānupādāya nirvāṇamupādāyobhayaṃ hi tat .. 12

भवेदभावो भावश्च निर्वाणमुभयं कथं ।
असंस्कृतं च निर्वाणं भावाभावौ च संस्कृतौ ॥ १३

bhavedabhāvo bhāvaśca nirvāṇamubhayaṃ kathaṃ .
asaṃskṛtaṃ ca nirvāṇaṃ bhāvābhāvau ca saṃskṛtau .. 13

भवेदभावो भावश्च निर्वाण उभयं कथं ।
न तयोरेकत्रास्तित्वमालोकतमसोर्यथा ॥ १४

bhavedabhāvo bhāvaśca nirvāṇa ubhayaṃ kathaṃ .
na tayorekatrāstitvamālokatamasoryathā .. 14

नैवाभावो नैव भावो निर्वाणमिति या ऽञ्जना ।
अभावे चैव भावे च सा सिद्धे सति सिध्यति ॥ १५

naivābhāvo naiva bhāvo nirvāṇamiti yā 'ñjanā .
abhāve caiva bhāve ca sā siddhe sati sidhyati .. 15

नैवाभावो नैव भावो निर्वाणं यदि विद्यते ।
नैवाभावो नैव भाव इति केन तदज्यते ॥ १६

naivābhāvo naiva bhāvo nirvāṇaṃ yadi vidyate .
naivābhāvo naiva bhāva iti kena tadajyate .. 16

परं निरोधाभगवान् भवतीत्येव नोह्यते ।
न भवत्युभयं चेति नोभयं चेति नोह्यते ॥ १७

paraṃ nirodhābhagavān bhavatītyeva nohyate .
na bhavatyubhayaṃ ceti nobhayaṃ ceti nohyate .. 17

तिष्ठमानो ऽपि भगवान् भवतीत्येव नोह्यते ।
न भवत्युभयं चेति नोभयं चेति नोह्यते ॥ १८

tiṣṭhamāno 'pi bhagavān bhavatītyeva nohyate .
na bhavatyubhayaṃ ceti nobhayaṃ ceti nohyate .. 18

न संसारस्य निर्वाणात्किं चिदस्ति विशेषणं ।
न निर्वाणस्य संसारात्किं चिदस्ति विशेषणं ॥ १९

na saṃsārasya nirvāṇātkiṃ cidasti viśeṣaṇaṃ .
na nirvāṇasya saṃsārātkiṃ cidasti viśeṣaṇaṃ .. 19

निर्वाणस्य च या कोटिः कोटिः संसरणस्य च ।
न तयोरन्तरं किं चित्सुसूक्ष्ममपि विद्यते ॥ २०

nirvāṇasya ca yā koṭiḥ koṭiḥ saṃsaraṇasya ca .
na tayorantaraṃ kiṃ citsusūkṣmamapi vidyate .. 20

परं निरोधादन्ताद्याः शाश्वताद्याश्च दृष्टयः ।
निर्वाणमपरान्तं च पूर्वान्तं च समाश्रिताः ॥ २१

paraṃ nirodhādantādyāḥ śāśvatādyāśca dṛṣṭayaḥ .
nirvāṇamaparāntaṃ ca pūrvāntaṃ ca samāśritāḥ .. 21

शून्येषु सर्वधर्मेषु किमनन्तं किमन्तवत् ।
किमनन्तमन्तवच्च नानन्तं नान्तवच्च किम् ॥ २२

śūnyeṣu sarvadharmeṣu kimanantaṃ kimantavat .
kimanantamantavacca nānantaṃ nāntavacca kim .. 22

किं तदेव किमन्यत्किं शाश्वतं किमशाश्वतं ।
अशाश्वतं शाश्वतं च किं वा नोभयमप्यतः ॥ २३
kiṃ tadeva kimanyatkiṃ śāśvataṃ kimaśāśvataṃ .
aśāśvataṃ śāśvataṃ ca kiṃ vā nobhayamapyataḥ .. 23

सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः ।
न क्व चित्कस्य चित्कश्चिद्धर्मो बुद्धेन देशितः ॥ २४
sarvopalambhopaśamaḥ prapañcopaśamaḥ śivaḥ .
na kva citkasya citkaściddharmo buddhena deśitaḥ .. 24

# द्वादशाङ्गपरीक्षा नाम षड्विंशतितमं प्रकरणं
## dvādaśāṅgaparīkṣā nāma ṣaḍviṃśatitamaṃ prakaraṇaṃ

पुनर्भवाय संस्कारानविद्यानिवृतस्त्रिधा ।
अभिसंस्कुरुते यांस्तैर्गतिं गच्छति कर्मभिः ॥ १
punarbhavāya saṃskārānavidyānivṛtastridhā .
abhisaṃskurute yāṃstairgatiṃ gacchati karmabhiḥ .. 1

विज्ञानं संनिविशते संस्कारप्रत्ययं गतौ ।
संनिविष्टे ऽथ विज्ञाने नामरूपं निषिच्यते ॥ २
vijñānaṃ saṃniviśate saṃskārapratyayaṃ gatau .
saṃniviṣṭe 'tha vijñāne nāmarūpaṃ niṣicyate .. 2

निषिक्ते नामरूपे तु षडायतनसंभवः ।
षडायतनमागम्य संस्पर्शः संप्रवर्तते ॥ ३
niṣikte nāmarūpe tu ṣaḍāyatanasaṃbhavaḥ .
ṣaḍāyatanamāgamya saṃsparśaḥ saṃpravartate .. 3

चक्षुः प्रतीत्य रूपं च समन्वाहारमेव च ।
नामरूपं प्रतीत्यैवं विज्ञनं संप्रवर्तते ॥ ४
cakṣuḥ pratītya rūpaṃ ca samanvāhārameva ca .
nāmarūpaṃ pratītyaivaṃ vijñanaṃ saṃpravartate .. 4

संनिपातस्त्रयाणां यो रूपविज्ञानचक्षुषां ।
स्पर्शः स तस्मात्स्पर्शाच्च वेदना संप्रवर्तते ॥ ५
saṃnipātastrayāṇāṃ yo rūpavijñānacakṣuṣāṃ .
sparśaḥ sa tasmātsparśācca vedanā saṃpravartate .. 5

वेदनाप्रत्यया तृष्णा वेदनार्थं हि तृष्यते ।
तृष्यमाण उपादानमुपादत्ते चतुर्विधं ॥ ६
vedanāpratyayā tṛṣṇā vedanārthaṃ hi tṛṣyate .
tṛṣyamāṇa upādānamupādatte caturvidhaṃ .. 6

उपादाने सति भव उपादातुः प्रवर्तते ।
स्याद्धि यद्यनुपादानो मुच्येत न भवेद्भवः ॥ ७

upādāne sati bhava upādātuḥ pravartate .
syāddhi yadyanupādāno mucyeta na bhavedbhavaḥ .. 7

पञ्च स्कन्धाः स च भवो भवाज्जातिः प्रवर्तते ।
जरामरणदुःखादि शोकाः सपरिदेवनाः ॥ ८

pañca skandhāḥ sa ca bhavo bhavājjātiḥ pravartate .
jarāmaraṇaduḥkhādi śokāḥ saparidevanāḥ .. 8

दौर्मनस्यमुपायासा जातेरेतत्प्रवर्तते ।
केवलस्यैवमेतस्य दुःखस्कन्धस्य संभवः ॥ ९

daurmanasyamupāyāsā jāteretatpravartate .
kevalasyaivametasya duḥkhaskandhasya saṃbhavaḥ .. 9

संसारमूलान् संस्कारानविद्वान् संस्करोत्यय्तः ।
अविद्वान् कारकस्तस्मान्न विद्वांस्तत्त्वदर्शनात् ॥ १०

saṃsāramūlān saṃskārānavidvān saṃskarotyaytaḥ .
avidvān kārakastasmānna vidvāṃstattvadarśanāt .. 10

अविद्यायां निरुद्धायां संस्काराणामसंभवः ।
अविद्याया निरोधस्तु ज्ञानेनास्यैव भावनात् ॥ ११

avidyāyāṃ niruddhāyāṃ saṃskārāṇāmasaṃbhavaḥ .
avidyāyā nirodhastu jñānenāsyaiva bhāvanāt .. 11

तस्य तस्य निरोधेन तत्तन्नाभिप्रवर्तते ।
दुःखस्कन्धः केवलो ऽयमेवं सम्यग्निरुध्यते ॥ १२

tasya tasya nirodhena tattannābhipravartate .
duḥkhaskandhaḥ kevalo ’yamevaṃ samyagnirudhyate .. 12

# दृष्टिपरीक्षा नाम सप्तविंशतितमं प्रकरणं
## dṛṣṭiparīkṣā nāma saptaviṃśatitamaṃ prakaraṇaṃ

दृष्टयो ऽभूवं नाभूवं किं न्व् अतीते ’ध्वनीति च ।
यास्ताः शाश्वतलोकाद्याः पूर्वान्तं समुपाश्रिताः ॥ १

dṛṣṭayo ’bhūvaṃ nābhūvaṃ kiṃ nv atīte ’dhvanīti ca .
yāstāḥ śāśvatalokādyāḥ pūrvāntaṃ samupāśritāḥ .. 1

दृष्टयो न भविष्यामि किमन्यो ऽनागते ’ध्वनि ।
भविष्यामीति चान्ताद्या अपरान्तं समाश्रिताः ॥ २

dṛṣṭayo na bhaviṣyāmi kimanyo ’nāgate ’dhvani .
bhaviṣyāmīti cāntādyā aparāntaṃ samāśritāḥ .. 2

अभूमतीतमध्वानमित्येतन्नोपपद्यते ।
यो हि जन्मसु पूर्वेषु स एव न भवत्ययं ॥ ३

abhūmatītamadhvānamityetannopapadyate .
yo hi janmasu pūrveṣu sa eva na bhavatyayaṃ .. 3

स एवात्मेति तु भवेदुपादाणं विशिष्यते ।
उपादानविनिर्मुक्त आत्मा ते कतमः पुनः ॥ ४

sa evātmeti tu bhavedupādāṇaṃ viśiṣyate .
upādānavinirmukta ātmā te katamaḥ punaḥ .. 4

उपादानविनिर्मुक्तो नास्त्यात्मेति कृते सति ।
स्यादुपादानमेवात्मा नास्ति चात्मेति वः पुनः ॥ ५

upādānavinirmukto nāstyātmeti kṛte sati .
syādupādānamevātmā nāsti cātmeti vaḥ punaḥ .. 5

न चोपादानमेवात्मा व्येति तत्समुदेति च ।
कथं हि नामोपादानमुपादाता भविष्यति ॥ ६

na copādānamevātmā vyeti tatsamudeti ca .
kathaṃ hi nāmopādānamupādātā bhaviṣyati .. 6

अन्यः पुनरुपादानादात्मा नैवोपपद्यते ।
गृह्येत ह्यनुपादानो यद्यन्यो न च गृह्यते ॥ ७
anyaḥ punarupādānādātmā naivopapadyate .
gṛhyeta hyanupādāno yadyanyo na ca gṛhyate .. 7

एवं नान्य उपादानान्न चोपादानमेव सः ।
आत्मा नास्त्यनुपादानो नापि नास्त्येष निश्चयः ॥ ८
evaṃ nānya upādānānna copādānameva saḥ .
ātmā nāstyanupādāno nāpi nāstyeṣa niścayaḥ .. 8

नाभूमतीतमध्वानमित्येतन्नोपपद्यते ।
यो हि जन्मसु पूर्वेषु ततो ऽन्यो न भवत्ययम् ॥ ९
nābhūmatītamadhvānamityetannopapadyate .
yo hi janmasu pūrveṣu tato 'nyo na bhavatyayam .. 9

यदि ह्ययं भवेदन्यः प्रत्याख्यायापि तं भवेत् ।
तथैव च स संतिष्ठेत्तत्र जायेत वामृतः ॥ १०
yadi hyayaṃ bhavedanyaḥ pratyākhyāyāpi taṃ bhavet .
tathaiva ca sa saṃtiṣṭhettatra jāyeta vāmṛtaḥ .. 10

उच्छेदः कर्मणां नाशस् तथान्येन कृतकर्मणां ।
अन्येन परिभोगः स्याद् एवमादि प्रसजय्ते ॥ ११
ucchedaḥ karmaṇāṃ nāśas tathānyena kṛtakarmaṇāṃ .
anyena paribhogaḥ syād evamādi prasajayte .. 11

नाप्यभूत्वा समुद्भूतो दोषो ह्यत्र प्रसज्यते ।
कृतको वा भवेदात्मा संभूतो वाप्यहेतुकः ॥ १२
nāpyabhūtvā samudbhūto doṣo hyatra prasajyate .
kṛtako vā bhavedātmā saṃbhūto vāpyahetukaḥ .. 12

एवं दृष्टिरतीते या नाभूमहमभूमहं ।
उभयं नोभयं चेति नैषा समुपपद्यते ॥ १३
evaṃ dṛṣtiratīte yā nābhūmahamabhūmahaṃ .
ubhayaṃ nobhayaṃ ceti naiṣā samupapadyate .. 13

अध्वन्यनागते किं नु भविष्यामीति दर्शनं ।
न भविष्यामि चेत्येतदतीतेनाध्वना समं ॥ १४
adhvanyanāgate kiṃ nu bhaviṣyāmīti darśanaṃ .
na bhaviṣyāmi cetyetadatītenādhvanā samaṃ .. 14

स देवः स मनुष्यश्चेदेवं भवति शाश्वतं ।
अनुत्पन्नश्च देवः स्याज्जायते न हि शाश्वतं ॥ १५
sa devaḥ sa manuṣyaścedevaṃ bhavati śāśvataṃ .
anutpannaśca devaḥ syājjāyate na hi śāśvataṃ .. 15

देवादन्यो मनुष्यश्चेदशाश्वततमतो भवेत् ।
देवादन्यो मनुष्यश्चेत्संततिर्नोपपद्यते ॥ १६
devādanyo manuṣyaścedaśāśvatatamato bhavet .
devādanyo manuṣyaścetsaṃtatirnopapadyate .. 16

दिव्यो यद्येकदेशः स्यादेक्देशश्च मानुषः ।
अशाश्वतं शाश्वतं च भवेत्तच्च न युज्यते ॥ १७
divyo yadyekadeśaḥ syādekdeśaśca mānuṣaḥ .
aśāśvataṃ śāśvataṃ ca bhavettacca na yujyate .. 17

अशाश्वतं शाश्वतं च प्रसिद्धमुभयं यदि ।
सिद्धे न शाश्वतं कामं नैवाशाश्वतमित्यपि ॥ १८
aśāśvataṃ śāśvataṃ ca prasiddhamubhayaṃ yadi .
siddhe na śāśvataṃ kāmaṃ naivāśāśvatamityapi .. 18

कुतश्चिदागतः कश्चित्किं चिद्गच्छेत्पुनः क्व चित् ।
यदि तस्मादनादिस्तु संसारः स्यान्न चास्ति सः ॥ १९
kutaścidāgataḥ kaścitkiṃ cidgacchetpunaḥ kva cit .
yadi tasmādanādistu saṃsāraḥ syānna cāsti saḥ .. 19

नास्ति चेच्छाश्वतः कश्चित्को भविष्यत्यशाश्वतः ।
शाश्वतो ऽशाश्वतश्चापि द्वाभ्यामाभ्यां तिरस्कृतः ॥ २०
nāsti cecchāśvataḥ kaścitko bhaviṣyatyaśāśvataḥ .
śāśvato 'śāśvataścāpi dvābhyāmābhyāṃ tiraskṛtaḥ .. 20

अन्तवान् यदि लोकः स्यात्परलोकः कथं भवेत् ।
अथाप्यनन्तवांल्लोकः परलोकः कथं भवेत् ॥ २१
antavān yadi lokaḥ syātparalokaḥ kathaṃ bhavet .
athāpyanantavāṃl̄ lokaḥ paralokaḥ kathaṃ bhavet .. 21

स्कन्धानामेष संतानो यस्माद्दीपार्चिषामिव ।
प्रवर्तते तस्मान्नान्तानन्तवत्त्वं च युज्यते ॥ २२
skandhānāmeṣa saṃtāno yasmāddīpārciṣāmiva .
pravartate tasmānnāntānantavattvaṃ ca yujyate .. 22

पूर्वे यदि च भज्येरन्नुत्पद्येरन्न चाप्यमी ।
स्कन्धाः स्कन्धान् प्रतीत्येमानथ लोको ऽन्तवान् भवेत् ॥ २३
pūrve yadi ca bhajyerannutpadyeranna cāpyamī .
skandhāḥ skandhān pratītyemānatha loko ’ntavān bhavet .. 23

पूर्वे यदि न भज्येरन्नुत्पद्येरन्न चाप्यमी ।
स्कन्धाः स्कन्धान् प्रतीत्येमान् लोको ऽनन्तो भवेदथ ॥ २४
pūrve yadi na bhajyerannutpadyeranna cāpyamī .
skandhāḥ skandhān pratītyemān loko ’nanto bhavedatha .. 24

अन्तवानेकदेशश्चेदेकदेशस्त्वनन्तवान् ।
स्यादन्तवाननन्तश्च लोकस्तच्च न युज्यते ॥ २५
antavānekadeśaścedekadeśastvanantavān .
syādantavānanantaśca lokastacca na yujyate .. 25

कथं तावदुपादातुरेकदेशो विनङ्क्ष्यते ।
न नङ्क्ष्यते चैकदेश एवं चैतन्न युज्यते ॥ २६
kathaṃ tāvadupādāturekadeśo vinaṅkṣyate .
na naṅkṣyate caikadeśa evaṃ caitanna yujyate .. 26

उपादानैकदेशश्च कथं नाम विनङ्क्ष्यते ।
न नङ्क्ष्यते चैकदेशो नैतदप्युपपद्यते ॥ २७
upādānaikadeśaśca kathaṃ nāma vinaṅkṣyate .
na naṅkṣyate caikadeśo naitadapyupapadyate .. 27

अन्तवच्चाप्यनन्तं च प्रसिद्धमुभयं यदि ।
सिद्धे नैवान्तवत्कामं नैवानन्तवदित्यपि ॥ २८
antavaccāpyanantaṃ ca prasiddhamubhayaṃ yadi .
siddhe naivāntavatkāmaṃ naivānantavadityapi .. 28

अथ वा सर्वभावानां शून्यत्वाच्छाश्वतादयः ।
क्व कस्य कतमाः कस्मात्संभविष्यन्ति दृष्टयः ॥ २९
atha vā sarvabhāvānāṃ śūnyatvācchāśvatādayaḥ .
kva kasya katamāḥ kasmātsaṃbhaviṣyanti dṛṣṭayaḥ .. 29

सर्वदृष्टिप्रहाणाय यः सद्धर्ममदेशयत् ।
अनुकम्पामुपादाय तं नमस्यामि गौतमं ॥ ३०
sarvadṛṣṭiprahāṇāya yaḥ saddharmamadeśayat .
anukampāmupādāya taṃ namasyāmi gautamaṃ .. 30